वर्षम्-४ अङ्कः-१६ ISSN : 975-2676

# संस्कृतवार्ता

## राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्

युगाब्दः ५११३-१४ वैक्रमाब्दः २०६९ चैत्र-शुक्ल ९ - आषाढशुक्ल ११ शकः १९३४ अप्रैल - जून २०१२

### कुलपतिवाक्

साम्प्रतिकानि वार्तापत्राणि प्रायो हृन्मर्मणि क्रकचैरिव दारणं कुर्वाणैः कृतान्ततुल्यैर्वृत्तान्तैः सम्भृतानि भवन्ति। आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते आनन्दं प्रयन्त्यभिसंविशन्तीति श्रुत्योक्तेः संस्कृतवार्ता तु हर्षकरीभिर्वार्ताभिरेवान्वितेति विशेषः। एतादृशीषु वार्तासु अस्मिन्नङ्के अष्टादशे पृष्ठे विलसति विद्युद्दूतप्रकाशनस्य तथा प्यारिसनगर्यां समायोजितस्य संस्कृतोत्सवस्यापि वार्ता। संस्कृतविद्या संस्कृतपरम्पराश्च सम्प्रति अन्ताराष्ट्रिये क्षितिजे नवावतारं विदधतीति विद्युद्दूतस्य प्रकाशनेन प्यारिससंस्कृतोत्सवेन च प्रमाणीक्रियते। अन्ताराष्ट्रियसंस्कृताध्ययनसमवायस्य (इन्टरनेशनल एसोशियेशन आफ संस्कृत स्टडीज इत्यस्य) नवनिर्वाचितैर्महासचिवैः श्रीजयन्द्रसोनीमहोदयै-रारब्धमिदं वैद्युतीयं त्रैमासिकवार्तापत्रं विद्युद्दूतो नाम। अस्य प्रवेशाङ्के विद्युद्दूतस्यानुबन्धचतुष्टयमिति स्वलेखस्योपसंहारे अयं जन एतदभि व्यानक्-



प्राकृतभाषासाहित्याध्ययनशालायाः समापनसमारोहावसरे दीपं प्रज्वालयन् आचार्यः राधावल्लभत्रिपाठी

**संवादाय विमर्शाय संस्कृतज्ञेषु वै मिथः।**
**शास्त्राणां च विकासाय नवोन्मेषाय भासितः।**
**संस्कृतप्रभया ध्वान्तं दूरीकुर्वंश्च भूतले।**
**आलोकाय च लोकानां विद्युद्दूतो भवेदलम्।।**

अवसरोऽयं यथा संस्कृतविद्याया नवावतारस्य परम्पराणां पुनराविष्कारस्य अधीतौ तेजस्विताया आपादनस्य वरीवर्ति तथैव आत्माविष्कारस्य परस्परं परिचयस्य तमःपूतानां संस्कृतसेवाव्रतिनां सम्मानस्यापि सम्प्राप्त इति संस्कृतवार्ताया विगताङ्के स्वाभिप्रायमभिव्यानगयं जनः। राष्ट्रियसंस्कृतसंस्थानस्य नाना कार्यक्रमाः आयोजनानि गतिविधयश्चाभिप्राय-मिमनुसरन्ति। महानयं हर्षस्य विषयो यद् विशिष्टसंस्कृतसेवाव्रतीति सम्मानः प्रतिवर्षं त्रिभ्यो दीयेत, एकलक्षरूप्यकमितो राशिश्च प्रत्येकं सम्मानार्हसंस्कृतसेवाव्रतिने समर्प्येत इति प्रस्तावो राष्ट्रियसंस्कृतसंस्थानस्य प्रबन्धमण्डलेनोरीकृतः। तदनुसृत्य त्रयः संस्कृतसेवाव्रतिनः सभाजयिष्यन्ते ऐषमः श्रावणीपूर्णिमायाम् संस्कृतमहोत्सवे। संस्कृतं येषां जीविकोपार्जनसाधनं नास्ति, परन्तु संस्कृताय ये तपस्यन्ति तान् प्रति कृतज्ञताप्रकाशनाय संस्कृतसमाजस्यायमुपक्रमः।



पावर-प्वाइंट-प्रदर्शनं कुर्वन् संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठी

अथैतस्मिन्नङ्के द्वादशे पृष्ठे प्रकाशिता वार्तापि संस्कृतस्य कृते नवीनवातायनोद्घाटनं सङ्केतयतीति विज्ञाः पाठका अवगच्छेयुः। विश्वसंस्कृतसम्मेलने अन्ताराष्ट्रियसंस्कृताध्ययन-समवायस्य सामान्यसभया षट् प्रस्तावा ऊरीकृता आसन्। ते यथा- राष्ट्रियसंस्कृतसंस्थानाय केन्द्रियविश्वविद्यालयत्वेन वैधानिकी मान्यता देया, राष्ट्रियपाण्डुलिप्यायोगस्य स्थायित्वं प्रकल्पनीयम्, द्वितीयसंस्कृतायोगस्य सङ्घटनं करणीयम्, संस्कृतपाठशालानां विकासाय उपाया विधेयाः, संस्कृतस्य स्रोतःसामग्रीणां प्रलेखनाय संसाधनकेन्द्राणि स्थापनीयानि, विश्वसंस्कृतसम्मेलनस्य प्रस्तुतीनां प्रकाशनं च कार्यमिति। मानवसंसाधनविकासमन्त्रालयेन एतेषां प्रस्तावानां क्रियान्वयनाय एका विशेषज्ञसमितिर्घटिता। श्रीलालबहादुरशास्त्रि-राष्ट्रियसंस्कृतविद्यापीठस्य कुलाधिपतयो न्यायमूर्तयो डा. मुकुन्दकामशर्माणोऽस्याः समितेरध्यक्षाः, राष्ट्रीयशैक्षिकयोजनाप्रशासनविश्वविद्यालयस्य कुलाधिपतयः कल्याणकुमार-चक्रवर्तिनः, पद्मभूषणसत्यव्रतशास्त्रिणः, के.एम. मुंशी, संस्थानस्य निदेशकाः वीराराघवन्महोदयाः, श्रीरामानुजदेवनाथाः, आचार्या दीप्तित्रिपाठिवर्याः, आचार्या रमेशचन्द्रपाण्डेया अस्याः समितेः सदस्या आसन्, अयं च जनः सदस्यसचिवः। समितेः विस्तृतं प्रतिवेदनं संस्तुतयश्च शासनाय समर्पिताः। शासनेन एतत्प्रतिवेदनमूरीकृत्य अवश्यमेव क्रियान्वयनदिशि सार्थकः पदक्षेपो विधास्यत इति विश्वसिमः।



कविभास्करीकार्यक्रमे ईरानदूतावासाधिकारिणः श्रीअलीरज़ादस्ज़ेवर्यस्यसम्माननं कुर्वन् संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठी

*–राधावल्लभः त्रिपाठी*

**मुख्यपरामर्शदाता**
आचार्यः राधावल्लभः त्रिपाठी
कुलपतिः
राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

**परामर्शदातृमण्डलम्**
आचार्यः रमाकान्तशुक्लः
आचार्यः के.बी. सुब्बरायुडुः
डा. शुक्ला मुखर्जी
डा. रत्नमोहनझाः
कू. वेङ्कटेशमूर्तिः

**सम्पादकौ**
डा. रमाकान्तपाण्डेयः
डा. प्रफुल्लगडपालः

'संस्कृतवार्ता'-सम्बद्धं स्वीयाभिप्रायम्, अत्र प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल्-सङ्केतेन प्रेषयन्तु-
**samskritavarta@gmail.com**

**संस्कृतवार्ता**
राष्ट्रियसंस्कृतसंस्थानस्य त्रैमासिकं वार्तापत्रम्
ISSN : 975-2676

प्रकाशकः
कुलसचिवः
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,
नवदेहली-110058
011-28524993, 28521994, 28520977
e-mail : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in

## प्रतिवार्ता



सकलभारते व्याप्तपरिसरं राष्ट्रियसंस्कृतसंस्थानं प्रकाशयन्ती, आभारतं भाजयन्ती, संस्कृतमातरं संसेवन्ती, संस्कृतलोकम् आलोकयन्ती, वार्ताप्रतिवार्तादीभिः स्तम्भैः जनान् रञ्जयन्ती इयं **'संस्कृतवार्ता'** सर्वदैव मोदयति मे मनः। यदा संस्कृतवार्ता हस्ते आयाति तदा अस्याः प्रसारक्षेत्रं प्रकाशितसमाचाराणां व्यापकता इत्यादिविषयान् दृष्ट्वा इत्थमनुभूयते यत् करबदरसदृशमखिलं संस्कृतजगत्। वार्तेयं छात्रान् अध्यापकान् संस्कृतानुरागि-बान्धवान् च अद्यतनीकरोति। अतः अस्याः प्रेरकेभ्यः संस्थानाधिकारिभ्यः श्रमं ज्ञानं च सन्निधाय प्रकाशनं कुर्वद्भ्यः मार्गदर्शकसम्पादकादिभ्यः मे मुहुर्मुहुः धन्यवादाः, अथ च इयं संस्कृतवार्ता प्रत्यहं नूतननवाचारैः समृद्धा सती अपूर्वां ख्यातिं लभेत इत्येव मे शुभाशयाः।

**डॉ. नीलाभतिवारी**
सहायकाचार्यः, शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसरः

## प्रवर्तिता कविभास्करी


कार्यक्रमे सम्बोधयन् आचार्यः रामजीसिंहः

राष्ट्रियसंस्कृतसंस्थानेन 'कविभास्करी' इति नाम्ना प्रवर्तितः पञ्चमोऽखिलभारतीय-संस्कृतकविसमवायः संस्थानमुख्यालयस्य सारस्वतसभागारे ११.०५.२०१२ दिनाङ्के महता वैभवेन समायोजितः। कार्यक्रमेऽस्मिन् अध्यक्ष-रूपेण संस्थानकुलपतिः आचार्यराधावल्लभ-त्रिपाठी उपातिष्ठत्। मुख्यातिथित्वेन राजस्थानस्य लाडनूंस्थजैनविश्वभारतीविश्वविद्यालयस्य कुलपतिचरः पूर्वसांसदश्च आचार्यरामजी-सिंहः आसीत्। सारस्वतातिथित्वेन श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य ज्योतिषविभागाध्यक्षचरः आचार्यरामदेवझा सभां शोभितवान्। कार्यक्रमारम्भे मङ्गलाचरणं डा. भागीरथिनन्देन कृतम्। कार्यक्रमेऽस्मिन् आचार्यराधावल्लभत्रिपाठिना ईरानदूतावासाधिकारिणः श्रीअलीरज़ादस्जे-महोदयस्य सम्मानः कृतः। तेन पारसीकभाषायाः महत्त्वमपि उपश्लोकितम्। त्रिपाठिमहाभागेन सुन्दर्याः 'कपोलकूपकम्' आश्रित्य प्रणीता गज़लगीतिः श्राविता। अवसरेऽस्मिन् जयपुरस्थ-जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्व-विद्यालयस्य कुलपतिना आचार्यरामानुज-देवनाथेन इक्षुदण्डकच्छन्दसा श्रीकृष्णस्य वर्णनं श्रावितम्। तेन काश्चन गाथा अपि श्राविताः। गुजराततः सम्प्राप्तेन आचार्यहर्षदेवमाधवेन मुखाकृतिग्रन्थ(फेसबुक)मवलम्ब्य कविता श्राविता। डा. रामकुमारशर्मा, डा. विष्णुकान्तझा, आचार्यरमेशकुमारपाण्डेयः, आचार्यरामदेवझाः, डा. बलरामशुक्लः, डा. रमाकान्तशुक्लश्च नवनवाभिः रचनाभिः सभारञ्जनमकुर्वन्। धन्यवादज्ञापनं संस्थानकुलसचिवः आचार्यः के.बी. सुब्बरायुडुः अकरोत्। डा. रमाकान्तपाण्डेयेन कार्यक्रमः सञ्चालितः।


काव्यं श्रावयन् आचार्यः राधावल्लभत्रिपाठी

## प्रवेशदिनाङ्कः वर्धितः

मुक्तस्वाध्यायपीठस्य विविधपाठ्यक्रमेषु प्रवेशदिनाङ्कः ०८.०८.२०१२ यावत् वर्द्धितः वर्तते। विलम्बशुल्केन सह १६.०८.२०१२ दिनाङ्कं यावत् प्रवेष्टुं शक्यते। आचार्यप्रवेशपरीक्षा २६.०८.२०१२ दिनाङ्के संस्थानस्य सर्वपरिसरेषु आयोजयिष्यते।

# राष्ट्रियसंस्कृतसंस्थाने राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः दलस्य पर्यवेक्षणं सम्पन्नम्

राष्ट्रियसंस्कृतसंस्थानस्य दिल्लीसहितम् एकादशपरिसराणां ०९.०४.२०१२ दिनाङ्कात् २६.०४.२०१२ दिनाङ्कं यावत् राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदः प्रवरसमितिः विशदं निरीक्षणं समपादयत्। ०९.०४.२०१२ दिनाङ्के संस्थानमुख्यालये राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदः प्रवरसमित्या निरीक्षणकार्यं विहितम्। ततो निश्चितकार्यक्रमानुसारेण संस्थानस्य विविधराज्यस्थितेषु परिसरेषु निरीक्षणं जातम्। तदित्थं वर्तते-

**राष्ट्रियसंस्कृतसंस्थानं राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए-श्रेण्यां' प्रत्यायितम्**

**इलाहाबादपरिसरे** - ११-१२.०४.२०१२ दिनाङ्कयोः राष्ट्रियसंस्कृतसंस्थानस्य इलाहाबादपरिसरे समित्या निरीक्षणं कृतम्। जयपुरस्थ-जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयस्य कुलपतिचरस्य तिरुपतिस्थ-राष्ट्रियसंस्कृतविद्यापीठस्य व्याकरणविभागाध्यक्षस्य च आचार्यस्य के.वी.रामकृष्णाचार्यस्य नेतृत्वे पर्यवेक्षणसमितिः इलाहाबादपरिसरं गता। अस्यां समितौ पाण्डिचेरीस्थ-पाण्डिचेरीविश्वविद्यालयस्य संस्कृत- विभागाध्यक्षः आचार्यः सी.एस. राधाकृष्णः चेन्नईस्थ-मद्रासविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः आचार्यः सीनिरुद्धदासश्चास्ताम्। पर्यवेक्षणसंयोजनं राष्ट्रियसंस्कृतसंस्थानस्य परियोजनाधिकारी डा. शुक्ला मुखर्जी अकरोत्।



पावर-प्वाइंट-प्रदर्शनं कुर्वन् संस्थानकुलपतिः आचार्यः राधावल्लभत्रिपाठी

**गुरुवायूरपरिसरे** - ११-१२.०४.२०१२ दिनाङ्कयोः गुरुवायूरपरिसरे समित्या निरीक्षणं विहितम्। वाराणसीस्थ-सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरस्य आचार्यस्य अशोककालियामहोदयस्य नेतृत्वे पर्यवेक्षणसमितिः परिसरमेतं गता। अस्यां समितौ कोलकातास्थ-जादवपुरविश्वविद्यालयस्य संस्कृतविभागाध्यक्षः आचार्यः मानबेन्दुबनर्जी, बेङ्गलूरुस्थ-राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदः सहायकपरामर्शदाता डा. गणेश ए. हेगडे, हरिद्वारस्थ-उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपतिः सुधारानीपाण्डेया च आसन्। पर्यवेक्षणसंयोजनं राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरे सहाचार्यः डा. वाई.एस. रमेशः कृतवान्।

**लखनऊपरिसरे** - १४-१५.०४.२०१२ दिनाङ्कयोः लखनऊपरिसरे समित्या निरीक्षणमकारि। १४.०४.२०१२ दिनाङ्के आचार्यस्य के.वी. रामकृष्णाचार्यस्य नेतृत्वे पर्यवेक्षणसमितिः लखनऊपरिसरं गता। अस्यां समितौ आचार्यः सी.एस. राधाकृष्णः आचार्यः सीनिरुद्धदासश्चास्ताम्। परिसरप्राचार्यः सुरेन्द्रझाः पर्यवेक्षणदलस्य सदस्यानां स्वागतं विधाय परिसरस्य गौरवपूर्णं परिचयं च प्रदाय साम्प्रतिकं विशेषं प्रास्तौत्। परिसरपक्षतः पर्यवेक्षणसंयोजकः डा. लक्ष्मीनिवासपाण्डेयः अस्मिन् मूल्याङ्कनावधौ परिसरेण विहितान् कार्यक्रमान् अवर्णयत्।

**शृङ्गेरीपरिसरे** - १४-१५.०४.२०१२ दिनाङ्कयोः शृङ्गेरीपरिसरे समित्या निरीक्षणं सम्पादितम्। आचार्यस्य अशोककालियामहोदयस्य नेतृत्वे नैकपर्यवेक्षणसमितिः तत्र गता। अस्यां समितौ आचार्यः मानबेन्दुबनर्जी, डा. गणेश ए. हेगडे, डॉ. पाण्डेयसुधारानी च आसन्। अत्र पर्यवेक्षणसंयोजनं डा. वाई. एस. रमेशः अकरोत्।

**जयपुरपरिसरे** - १७-१८.०४.२०१२ दिनाङ्कयोः जयपुरपरिसरे समित्या निरीक्षणं प्रत्यपादि। रामटेकस्थ-कविकुलगुरुकालिदास- संस्कृतविश्वविद्यालयस्य कुलपतेः आचार्यस्य पङ्कजकुमारचान्देमहोदयस्य नेतृत्वे पर्यवेक्षणसमितिः परिसरं गता। अस्यां समितौ वाराणसीस्थ-काशीहिन्दूविश्वविद्यालयस्य वेदसङ्कायप्रमुखः आचार्यकृष्ण-कान्तशर्मा, चण्डीगढस्थ-चण्डीगढविश्वविद्यालयस्य संस्कृतविभागाध्यक्षा आचार्या अरुणागोयल च आस्ताम्। पर्यवेक्षणसंयोजनं डा. शुक्लामुखर्जी अकरोत्।

**मुम्बई-परिसरे** - १७-१८.०४.२०१२ दिनाङ्कयोः राष्ट्रियसंस्कृतसंस्थानस्य मुम्बई-परिसरे समित्या निरीक्षणं कृतम्। आचार्यस्य के.वी.रामकृष्णाचार्यस्य नेतृत्वे पर्यवेक्षणसमितिः तत्र गता। अस्यां समितौ आचार्यः सी.एस. राधाकृष्णः आचार्यः श्रीनिरुद्धदासश्चास्ताम्। अत्र पर्यवेक्षणसंयोजनं डा. वाई. एस. रमेशः अकरोत्।



नैकदलसदस्यैः सह विचारं कुर्वन् आचार्यः राधावल्लभत्रिपाठी

**जम्मूपरिसरे** – २०-२१.०४.२०१२ दिनाङ्कयोः जम्मूपरिसरे समित्या निरीक्षणं विहितम्। आचार्यस्य पङ्कजकुमारचान्देमहोदयस्य नेतृत्वे पर्यवेक्षणसमितिः गता। अस्यां समितौ आचार्यः कृष्णकान्तशर्मा अरुणा गोयल च आस्ताम्। पर्यवेक्षणसंयोजकौ डा. शुक्लामुखर्जी-डा. वाई. एस. रमेशः च अत्र स्वीयदायित्वं निरवहताम्।

**हिमाचलस्थवेदव्यासपरिसरे** – हिमाचलस्थवेदव्यासपरिसरे २२-२३.०४.२०१२ दिनाङ्कयोः प्रवरसमितेः निरीक्षणकार्यक्रमः प्राचलत्। अस्याः समितेः अध्यक्षत्वेन आचार्यः पङ्कजचान्दे स्वदायित्वं निरवहत्। आचार्यकृष्णकान्तशर्मा आचार्या अरुणागोयल च सदस्यत्वेन इमां समितिम् अलमकार्ष्टाम्। डा. गणेश ए. हेगडे अपि इमां समितिं पर्यभूषयत्। एभिः सह राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिवः सदस्यत्वेन समागत्य निरीक्षणकार्ये सहयोगमकरोत्।

**पुरीपरिसरे** – २३-२४.०४.२०१२ दिनाङ्कयोः पुरीपरिसरे समित्या निरीक्षणं सम्पादितम्। आचार्यस्य अशोककालियामहोदयस्य नेतृत्वे पर्यवेक्षणसमितिः तत्र गता। अस्यां समितौ आचार्यः मानबेन्दुबनर्जी, डा. पाण्डेयसुधारानी च आस्ताम्। अत्र पर्यवेक्षणसंयोजकः डा. वाई.एस. रमेशः आसीत्।


**भोपालपरिसरे** – २३-२४.०४.२०१२ दिनाङ्कयोः राष्ट्रियसंस्कृतसंस्थानस्य भोपालपरिसरे समित्या निरीक्षणं कृतम्। आचार्यस्य के.वी.रामकृष्णाचार्यस्य नेतृत्वे पर्यवेक्षणसमितिः भोपालपरिसरं गता। अस्यां समितौ आचार्यः सी.एस. राधाकृष्णः आचार्यः सीनिरुद्धदासश्चास्ताम्। पर्यवेक्षणसंयोजिका डा. शुक्ला मुखर्जी अपि दलेन सह गतवती।

इत्येवं राष्ट्रियसंस्कृतसंस्थानस्य नवदेहलीसहितम् एकादशपरिसरेषु राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदः दलेन निरीक्षणं विहितम्। ततः सर्वेषां परिसराणां पृथक्पृथक् मूल्याङ्कनविवरणं दलेन प्रस्तुतम्। सर्वेषामपि परिसराणां विवरणानां मूल्याङ्कनान्तरम् संस्थानस्य उल्लेखनीयानां कार्याणां सराहनापुरस्सरम् संस्थानमिदं राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्यां प्रत्यायितमभूत्। राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदो दलेन संस्थानस्य उपलब्धिनां प्रशंसापुरस्सरं संसद-अधिनियमेन केन्द्रीयविश्वविद्यालयत्वेन संवर्धनीयमित्यपि संस्तुतिः कृता वर्तते।

**संस्थानेन घटिता आसीत् काचित् राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदः परिचालन-समितिः**


राष्ट्रियसंस्कृतसंस्थानस्य कुलपतेः आचार्यस्य राधावल्लभत्रिपाठिमहोदयस्य कुशलमार्गदर्शने काचित् राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदः परिचालनसमितिः घटिता आसीत्। अस्या समितेः अध्यक्षः सदस्याश्च इमे आसन् – १. आचार्यः वेम्पटिकुटुम्बशास्त्री (अध्यक्षः), २. संस्थानकुलसचिवः (सदस्यः), ३. डा. वाई. एस. रमेशः (सदस्यः), ४. शुक्लामुखर्जी (सदस्यसचिवः) च। ततोऽपि काचित् उपसमितिरपि घटिता, यस्याः सदस्यानां दायित्वं परिसरशः अधोनिर्दिष्टैः प्राध्यापकैः निर्व्यूढम् – १. डा. वाई.एस. रमेशः – इलाहाबाद-जम्मू-गुरुवायूर- शृङ्गेरीपरिसराः, २. सुदेशकुमारशर्मा – पुरी-जयपुर-मुम्बईपरिसराः, डा. लक्ष्मीनिवासपाण्डेयः – लखनऊ-गरली-भोपालपरिसराः च। एते समितिसदस्याः अधिकारिणश्च तदा तदा बेङ्गलूरुस्थराष्ट्रियमूल्याङ्कन- प्रत्यायनपरिषदः कार्यालयं परिसरान् च गत्वा अपेक्षितान् परामर्शान् कृत्वा परिसरेषु सुव्यवस्थाः साधितवन्तः। संस्थानेन राष्ट्रियमूल्याङ्कन- प्रत्यायनपरिषद्द्वारा 'ए'-श्रेण्यां प्रत्यायितुम् एते अत्यन्तं श्रमं कृतवन्तः। एते सर्वेऽपि अभिनन्दनार्हाः।




## राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा कृतस्य परीसरीयपरीक्षणस्य कानिचन दृश्यानि






## राष्ट्रपतिसम्मानसमारोहः सम्पन्नः

भारतशासन-मानवसंसाधनविकासमन्त्रालयस्य उच्चशिक्षाविभागेन संस्कृत-पालि-प्राकृतभाषाणां विकासाय प्रयतमानानां विदुषां कृते प्रतिवर्षं सम्मानप्रमाणपत्राणि महर्षिबादरायणव्याससम्मानपत्राणि च प्रदीयन्ते। राष्ट्रियसंस्कृतसंस्थानम् अस्य उपक्रमस्य निर्वाहं करोति। संस्कृत-पालि/प्राकृत-भाषाणां संरक्षण-उन्नयन-विकास-प्रचारादिदिशि कृतभूरिपरिश्रमा विद्वांसः एतत्परियोजनानन्तर्गततया सम्मानिताः भवन्ति। भारतस्य महामहिमराष्ट्रपतयः श्रीमत्यः प्रतिभादेवीसिंहपाटीलमहाभागाः १९.०६.२०१२ तमे दिनाङ्के राष्ट्रपतिभवने २०१०-२०११ वर्षयोः कृते चितेभ्यः संस्कृत-पालि/प्राकृतविद्वद्भ्यः सम्मानपत्रं, राङ्कवं पञ्च-लक्षात्मकं धनराशिं च प्रदत्तवत्यः। अवसरेऽस्मिन् एतत्परियोजनानन्तर्गततया प्रदीयमानं महर्षिबादरायणव्याससम्मानपत्रं प्राप्तकर्तॄणां कृतेऽपि राष्ट्रपतयः सम्मानपत्रं, राङ्कवम् एकलक्षरूप्यकाणि च अयच्छन्।

राष्ट्रपतिसम्मानं प्राप्तुम् एते विद्वांसः कार्यक्रमे समुपस्थिताः आसन्-



२०१० तमस्य वर्षस्य कृते सम्मानितानां विदुषां समूहचित्रम्



२०११ तमस्य वर्षस्य कृते सम्मानितानां विदुषां समूहचित्रम्

**२०१० तमस्य वर्षस्य कृते राष्ट्रपतिभवने सम्मानिताः विद्वांसः -**

१. आचार्यः वी. स्वामिनाथन्, २. आचार्यः उमाशङ्करशर्मा 'ऋषिः', ३. डा. शङ्करदेवशर्मा अवतरे, ४. आचार्यः विजयदेवशङ्करपण्ड्या, ५. आचार्यः हेच्. वि. नागराजरावः, ६. पं. मोतीरामशास्त्री, ७. डा. देवीप्रसादखण्डेरावखरवण्डीकरः, ८. पं. भुवनेश्वरकरः, ९. पं. मदनमोहनशर्मा, १०. प्रो. सीतानाथदे, ११. डा. कपिलदेवद्विवेदी (कृते तत्पुत्रः), १२. डा. गणेशदत्तशर्मा, १३. डा. जयदत्त उप्रेती, १४. प्रो. डा. चाबा तोत्तोशी (कृते तच्छिष्या मारिया नेज्यैशी), १५. डा. उदयचन्द्रजैनः च।

**२०११ तमस्य वर्षस्य कृते राष्ट्रपतिभवने सम्मानिताः विद्वांसः-**

१. आचार्यः काणियम्पाक्कम् इलयविल्ली गोविन्दन्, २. डा. नोदनाथमिश्रः, ३. डा. सत्यदेवचौधरी, ४. डा. मणिभाई ईश्वरभाई प्रजापतिः, ५. पं. केशवरामशर्मा, ६. आचार्यः रहसबिहारीद्विवेदी, ७. आचार्यः सदाशिवप्रहराजः, ८. आचार्यः इन्द्रदत्त उनियालः, ९. डा. सत्यव्रतवर्मा, १०. आचार्यः अङ्गराजचौधरी च।

**महर्षिबादरायणव्याससम्मानप्राप्तकर्तारः-**

१. डा. ब्रजभूषण ओझा, २. डा. सोमनाथदाशः, ३. डा. सम्पदानन्दमिश्रः, ४. डा. वीरनारायणः एन. के. पाण्डुरङ्गी, ५. डा. धर्मेन्द्रकुमारसिंहदेवः, ६. डा. महावीरप्रभाचन्द्रशास्त्री च।

कार्यक्रमे अष्टौ विद्वांसोऽनुपस्थिता आसन्। अवसरेऽस्मिन् राष्ट्रपतिना उर्दू-अरबी-फ़ारसी-विद्वांसोऽपि सम्मानिताः।

अभिनन्दनम्

## राष्ट्रपतिसम्मानसमारोहस्य कानिचन दृश्यानि



## मुक्तस्वाध्यापीठेन संस्कृतकविसमवायः समायोजितः

नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानेन ०९.०५.२०१२ तमे दिनाङ्के नवदेहलीस्थ-महाशय-चून्नीलाल-सरस्वती-बालविद्यामन्दिरस्य सभागारे अनौपचारिकः संस्कृतकविसमवायः समायोजितः। आयोजनमिदं संस्थानस्य मुक्तस्वाध्यायपीठस्य तत्त्वावधानेऽनुष्ठितमभूत्। संस्थानकुलपतेः आचार्यराधावल्लभत्रिपाठिनः आध्यक्ष्ये समायोजितेऽस्मिन् एकविंशतिसंख्याकैः कविभिः स्वरचनाः पठिताः। जम्मूतः समागतेन डा. धनञ्जयमिश्रेण 'वेतनवृद्धिः कदा भविता:' इतीयं रचना श्राविता। हिमाचलप्रदेशस्य बलाहरात् सम्प्राप्तेन डा. राधावल्लभशर्मणा 'श्रीबालकृष्णं भजे' इत्येवंप्रकारेण मङ्गलाचरणं विधाय 'कौन्तेयः पुनरपि मोहपथे, भयभीतदशायां धर्मरथे। रणभेरीवादनकालोऽयं, शृङ्गारगीतसमयो न सखे।।' इति गीतं प्रस्तुतम्। जयपुरतः समागता डा. रानीदाधीच 'इयं कार्यशाला ...' इत्यादिभिः अनुष्टुब्भिः पाठलेखनकार्यशालाया वर्णनमकरोत्। हरियाणाप्रदेशस्य बघौलातः समागतेन डा. पङ्कजकुमारव्यासेन शिखरिणीवृत्तेन 'मधुमदयुतोऽहं समभवम्' इत्येतच्छीर्षकेण समस्यापूर्तिपरकाः श्लोकाः श्राविताः। वाराणसीतः सम्प्राप्तेन डा. दिनेशगर्गेण 'चित्रकूटे मनो राजतां मे सदा' अपि च 'विश्वनाथः सदा रक्षताद् भारतम्' इति शीर्षकद्वयेन काव्यं पठितम्। भोपालतः समागतेन डा. धर्मेन्द्रकुमारसिंहदेवेन मन्दाक्रान्तावृत्तेन शारदा-वन्दना विहिता किञ्च 'प्रथमे समागमे' इतीयं शृङ्गारपरा रचना श्राविता। बघौलातः समायातेन डा. राजकुमारमिश्रेण सरस्वती-वन्दनानन्तरं 'ते जना हि के' इत्येतच्छीर्षका रचना पठिता। जयपुरतः समायातः श्रीप्रमोदकुमारशर्मा जगद्गुरुरामानन्दाचार्य-संस्कृतविश्वविद्यालयमवलम्ब्य शार्दूलविक्रीडितैः 'सोऽयं चाद्य महर्षिणा प्रकटितो नारायणेन स्वयम्' इत्येतत्काव्यमपठत्। मन्दाक्रान्तावृत्तेन निबद्धा 'माधुरी दीक्षितेयम्' इतीमां रचनामपि सोऽपठत्। जयपुरतः सम्प्राप्तेन डा. उमाकान्तचतुर्वेदेन सप्त पद्यानि प्रस्तुतानि। दिल्लीतः डा. भागीरथिनन्दः द्रुतविलम्बितेन पद्यानि सस्वरं पठितवान् - 'श्रितहिमालयभूधरमस्तकं जलधिनीलजलार्चितपादकम्। ... भुवि विभाति विभूषितभारतम्।' शृङ्गेरीतः सम्प्राप्तः श्रीराघवेन्द्रभट्टः आशुकविता अश्रावयत्। जयपुरतः सम्प्राप्तेन आचार्यरामकुमारशर्मणा 'कार्यशालायाम्' इत्यतेतच्छीर्षकयुतायां रचनायां सभङ्गश्लेषस्य चमत्कारः समुत्पादितः। हास्यव्यङ्ग्यपरकेयं रचना श्रोतृभिः बहु प्रशंसिता।

लखनऊतः समायातेन डा. रामलखनपाण्डेयेन मानवगीतिः श्राविता- 'स्मर निजमिह महिमानम्, मानव विस्मर मा पन्थानम्।' तेन 'वयमिह दीना दिने दिने' इत्येतन्मुकुटालङ्कृता गीतिरपि श्राविता। दिल्लीस्थेन आचार्यरमेशकुमारपाण्डेयेन ''मातृभूमिवेदिका'' रचनायां मातृभूमेर्वन्दना कृता- ''मातृभूमिवेदिका मदीयमातृदेवता''। डा. नोदनाथमिश्रेण सरस्वतीवन्दना, मुक्तकानि व्योमयानबालिका चेति रचनाः पठिताः। वाराणसीतः सम्प्राप्तेन डा. प्रभुनाथद्विवेदिना हास्यरसव्यञ्जकानि पद्यानि प्रस्तुतानि। दिल्लीवासिना डा. रमाकान्तशुक्लेन 'अभिनवहितोपदेशः' इतीयं हास्यव्यङ्ग्यपूरिता प्रबन्धरचना श्राविता, यत्र पुत्रेण प्रार्थितः पिता तस्मै सञ्चारमाध्यमेषु प्रचारमाप्तुम् उपायान् निर्दिशति। मथुरातः सम्प्राप्तेन आचार्यकृष्णकान्तचतुर्वेदेन बालकृष्णस्य वर्णनम् स्रग्धरावृत्तेन विहितम्। पुनश्च तेन गेयरचना श्राविता - ''हन्त हा भारते तत्र नित्यम्!'' तेन भारतस्य अतीतेन वर्तमानस्य तुलना विहिता। हिमाचलप्रदेशात् आगतेन आचार्येण 'अभिराज'राजेन्द्रमिश्रेण प्रत्यग्रा गजलगीतिः श्राविता- 'अन्धकारे प्रदीप्तोऽभवं दिक्प्रसारे सुदीप्तोऽभवम् वैदुषीणाम् अहो का कथा मौढ्यभावेऽपि दृप्तोऽभवम्। नित्ययात्राप्रसङ्गैरहो पश्य भार्यावियुक्तोऽभवम्।' अभिराजेण गङ्गावतरणगीतिरपि श्राविता- ''परया भगीरथचर्यया भुवमागता भागीरथी .... चन्दिरविभाजलवर्षिणी भुवमागता भागीरथी।'' कार्यक्रमस्यास्य अध्यक्षेण आचार्यराधावल्लभत्रिपाठिना कवयः अभिनन्दिताः धन्यवादैश्च सभाजिताः। तेन 'वयं स्मः शम्बूकाः' इत्येतच्छशीर्षकयुता मुक्तच्छन्दसा प्रणीता रचनाऽपि श्राविता। कविसम्मेलनस्य सञ्चालनं डा. रत्नमोहनझा अकरोत्। कवीनां स्वागतं डा. रमाकान्तपाण्डेयेन विहितम्। पद्यमयं धन्यवादज्ञापनं श्रीवेङ्कटेशमूर्तिना कृतम्।

## समकालिक-संस्कृतकविता-षाण्मासिकी 'पद्यबन्धा' प्रकाशिता

भोपालस्थ-वीणापाणि-संस्कृत-पीठानुकुल्येन 'पद्यबन्धा' इत्याख्या समकालिकसंस्कृतकवितापत्रिका ऐदम्प्राथम्येन सबहुमानं प्रकाशिता। डा. बनमालीबिश्वालस्य प्रधानसम्पादकत्वे डा. धर्मेन्द्रकुमारसिंहदेवस्य च सम्पादकत्वे अस्याः षाण्मासिक्याः प्रवेशाङ्कः लोकार्पितः, यत्र आचार्यराधावल्लभत्रिपाठि-जगन्नाथपाठक-राजेन्द्रमिश्र-श्रीनिवासरथ-हर्षदेवमाधव-सदृशानां नैकेषां प्रतिष्ठितानां कवीनां तथा प्रतिभावतां युवककवीनाञ्च नूत्नाः काव्यविधाः (मौलिकाः अनूदिताश्च) अत्र पत्रिकाविषयीभूताः सन्ति। अस्याः अग्रिमाङ्काय सर्वथा अप्रकाशिता अभिनवाश्च प्रत्यग्र-कविताः सम्पादकेभ्यः अचिरादेव प्रेषयितुं शक्यन्ते।

## आचार्यो वेम्पटिकुटुम्बशास्त्री कुलपतित्वेन नियुक्तः



राष्ट्रियसंस्कृतसंस्थानस्य शृङ्गेरीपरिसर-प्राचार्यः किञ्च अन्ताराष्ट्रियसंस्कृताध्ययन-समवायस्य अध्यक्षः आचार्यः वेम्पटि-कुटुम्ब-शास्त्री गुजरातप्रान्तस्य श्रीसोमनाथसंस्कृत-विश्वविद्यालयस्य कुलपतित्वेन नियुक्तः। १२.०६.२०१२ दिनाङ्के अयं महोदयः शृङ्गेरीपरिसरप्राचार्यपदेन कार्यमुक्तस्सन् तत्र कुलपतिपदभारं गृहितवान्। आचार्यः वेम्पटिकुटुम्बशास्त्री राष्ट्रियसंस्कृतसंस्थान-सम्पूर्णानन्द-संस्कृतविश्वविद्यालययोः कुलपतिरूपेण अपि कार्यम् अकरोत्।



उद्घाटनकार्यक्रमे भाषमाणः आचार्यः राधावल्लभत्रिपाठी

## राष्ट्रिया प्राकृतसङ्गोष्ठी सम्पन्ना

नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थान-श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठयोः संयुक्तोपक्रमेण १०-१२ मई, २०१२ मिते काले राष्ट्रिया प्राकृतसङ्गोष्ठी प्रवृत्ता। सङ्गोष्ठ्यामस्याम् उद्घाटन-समापनसत्रयोः अतिरिक्ततया २५ शैक्षणिक-सत्राणि सम्पन्नानि। सङ्गोष्ठ्याम् आहत्य १२० गवेषणापूर्णाः शोधलेखाः विद्वद्भिः प्रस्तुता विमृष्टाश्च। प्राकृत-जगति इयं काचित् अपूर्वैव घटना आसीत्। अस्या सङ्गोष्ठ्याः उद्घाटनकार्यक्रमः १० मई, २०१२ तमे दिनाङ्के नवदेहलीस्थ-भारतीयविदेशव्यापारसंस्थानस्य विशाले सभागारे अजायत। उद्घाटनकार्यक्रमस्यास्य मुख्यातिथित्वेन केन्द्रीयग्रामीणविकासराज्यमन्त्री श्रीप्रदीपजैनः 'आदित्यः', विशिष्टातिथित्वेन उच्चतमन्यायालयन्यायाधीशचरः श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठ-कुलाधिपतिश्च न्यायमूर्तिः डा. मुकुन्दकामशर्मा, सारस्वतातिथित्वेन जैनविश्वभारतीविश्वविद्यालयकुलपतिः समणी डा. चारित्रप्रज्ञा अपि च वाराणसीस्थ-इन्दिरागान्धीराष्ट्रियकलाकेन्द्रस्य समन्वयकः आचार्यः कमलेशदत्तत्रिपाठी, अध्यक्षत्वेन नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी च आसन्। स्वागतभाषणं श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य कुलसचिवः डा. बी.के. महापात्रः अकरोत्।

मुख्यातिथिः प्रदीपजैनः 'आदित्यः' प्राकृतभाषां लोकतन्त्रीयभाषारूपेण प्रतिपादयन् प्राकृतपरम्परायाः इतिवृत्तं प्रास्तौत्। 'भगवतो महावीरस्य भगवतो बुद्धस्य च उपदेशानां माध्यमभाषेयं भारतीयसंस्कृते प्राणतत्त्वरूपा वर्तते' इति सः सोदाहरणं प्रख्यापितवान्। विशिष्टातिथिः न्यायमूर्तिः डा. मुकुन्दकामशर्मा प्राकृतभाषायाः जनभाषात्वम् उपस्थापितवान्। सारस्वतातिथिः समणी डा. चारित्रप्रज्ञा अकथयत् यत् 'भारतीयभाषाणां सम्पूर्णं लोककथासाहित्यं प्राकृतग्रन्थेभ्य एव अनुप्राणितं वर्तते' इति। सारस्वतातिथिः आचार्यः कमलेशदत्तः त्रिपाठी प्राकृत-संस्कृतभाषयोः परस्परसम्बन्धम् उपस्थापयत्। अध्यक्षीयवक्तव्यत्वेन आचार्यः राधावल्लभत्रिपाठी प्राकृतभाषा-साहित्ययोः भारतीयपरम्परायां योगदानं प्रास्तौत्। डा. श्रीयांसकुमारसिंघई-कृतेन धन्यवादज्ञापनेन सामूहिकराष्ट्रगानेन च उद्घाटनसमारोहोऽयं सम्पन्नः।



कस्यचित् सत्रस्य एकं दृश्यम्

उद्घाटनसत्रान्तरं विभिन्नेषु वर्गेषु २५ शैक्षिकसत्राणि नवदेहलीस्थ-श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य सभागारे प्राचलन्। वर्गाणां नामानि इत्थम् आसन्-

१. प्राकृतस्य आगमसाहित्यम् (Canonical Literature of Prakrit), २. प्राकृतस्य रूपकसाहित्यम् (Drammatical Literature of Prakrit), ३. प्राकृतस्य काव्यसाहित्यम् (Poetic Literature of Prakrit), ४. प्राकृतस्य कथासाहित्यम् (Fiction Literature of Prakrit), ५. प्राकृतस्य व्याकरणसाहित्यम् (Grammatical Literature of Prakrit), ६. प्राकृतस्य अभिलेखीयसाहित्यम् (Inscriptional Literature of Prakrit), ७. प्राकृतस्य लाक्षणिकसाहित्यम् (Chasacteristic Literature of Prakrit), ८. प्राकृतस्य पाण्डुलिपयः (Manuscripts of Prakrit language), ९. प्राकृतस्य भाषिकेतिवृत्तं वर्गीकरणं च (Lingual History and Classification of Prakrit Language)। इत्येवम् उपर्युक्तेषु वर्गेषु विविधानि सत्राणि प्रचलितानि।

अस्याः सङ्गोष्ठ्याः समापन-सत्रं १२ मई, २०१२ तमे दिनाङ्के सायं ४:३० वादने समायोजितमासीत्। अत्र अनौपचारिकचर्चायां सुनिश्चितं यत् 'प्राकृत'नाम्ना किञ्चन विश्वव्यापिजालपुटं निर्मितं स्यादिति। ततः संयोजकः सङ्गोष्ठ्या प्रतिवेदनं प्रास्तौत्। तत्र इमे विषयाः उल्लेखार्हा वर्तन्ते- १. प्राकृत-अकादम्याः स्थापना, २. विश्वप्राकृतसम्मेलनस्य [World Prakrit Conference] समायोजनम्, ३. विश्वप्राकृतप्रतिभासमवायस्य [International Association of Prakrit Scholars] स्थापना च।

समापनसत्रस्य मुख्यातिथित्वेन आचार्यः अभिराजराजेन्द्रमिश्रः, सारस्वतातिथित्वेन आचार्यः रामजीसिंहः अध्यक्षत्वेन आचार्यः के.बी. सुब्बरायुडुः च सभां शोभितवन्तः। आचार्यः राजेन्द्रमिश्रः प्राकृतभाषासाहित्ययोः महत्त्वं प्रत्यपादयत्। आचार्यः रामजीसिंहः प्राकृतभाषायाः विकासयात्रां प्रस्तुतवान्। आचार्यः के.बी. सुब्बरायुडुः संस्कृतप्राकृतयोः सुहृत्सम्बन्धं प्रख्यापयन् प्राकृताध्ययनस्य कृते सर्वकारेण सम्यग्व्यवस्था कल्पनीया इति अकथयत्। ततः आचार्यो रमेशकुमारपाण्डेयः धन्यवादज्ञापनमकरोत्। समापनसत्रस्यास्य सञ्चालनं मुक्तस्वाध्यायपीठ-निदेशको डा. रमाकान्तपाण्डेयः समकरोत्। इत्येवम् इयं सङ्गोष्ठी सफलतया सम्पूर्तिं गता।



सङ्गोष्ठ्याः समापनसमारोहस्य एकं दृश्यम्




सङ्गोष्ठयां मञ्चासीनाः अतिथयः विद्वांसश्च

# गुवाहाटीनगरे सङ्गोष्ठी समायोजिता

नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानेन गुवाहाटीस्थ-कॉटन-महाविद्यालयस्य संस्कृतविभागस्य सहयोगेन मईमासस्य २१-२२ दिनाङ्कयोः भारतगौरव-आनन्दरामबडुआमहोदयस्य १६२तमस्य जन्माब्दसमारोहस्य अवसरे काचित् राष्ट्रिया संस्कृतसङ्गोष्ठी समायोजिता। कार्यक्रमोऽयं कॉटनमहाविद्यालयस्य के.वी.आर. सभागारे समायोजितोऽभवत्। २१.०५.२०१२ दिनाङ्के अस्य उद्घाटनसत्रं सम्पन्नम्। उद्घाटनकार्यक्रमेऽस्मिन् मुख्यातिथित्वेन भारतशासनस्य पूर्वोत्तरराज्यविकासराज्यमन्त्री श्रीपवनसिंहघटवारः, अध्यक्षत्वेन नवदेहलीस्थ-श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृत-विद्यापीठस्य कुलाधिपतिः न्यायमूर्तिः डा. मुकुन्दकामशर्मा, विशिष्टातिथित्वेन असमसाहित्यसभायाः सभापतिः श्री रं वं तेरां चासन्। मुख्यवक्तृत्वेन नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी 'भारतगौरव-आनन्दरामबडुआ-महोदयस्य संस्कृते योगदानम्' इति विषयं समुपास्थापयत्।



सङ्गोष्ठयां कस्यचन सत्रस्य एकं दृश्यम्

ततः काटनमहाविद्यालयस्यैव सभाप्रकोष्ठे सङ्गोष्ठ्यङ्गतया 'भारतगौरव-आनन्दरामबडुआ-महोदयस्य संस्कृते योगदानम्' इति विषयमाधृत्य शैक्षिकसत्राणि प्राचलन्। तत्र सत्राणां विषयास्तावत् इत्थम् आसन्- कोशकाररूपेण भाषाविद्रूपेण च आनन्दराम-बडुआ, आनन्दरामबडुआमहोदयस्य संस्कृतव्याकरणस्य सन्दर्भे व्याकरणशास्त्रस्य आयामाश्च, पाठालोचने आनन्दरामबडुआमहोदयस्य योगदानम्, साहित्यसमीक्षकत्वेन आनन्दरामबडुआ, भारतविद्यायाः महाविस्तारः, संस्कृतकविरूपेण आनन्दरामबडुआ च। एतेषां शैक्षिकसत्राणाम् अतिरिक्ततया २१.०५.२०१२ दिनाङ्के सायं के.बी.आर. सभागारे सांस्कृतिक-कार्यक्रमोऽपि समायोजितः।

२२.०५.२०१२ दिनाङ्के अस्या सङ्गोष्ठ्याः समापनसमारोहः सायंकाले समायोजितोऽभूत्। अस्मिन् कार्यक्रमे मुख्यातिथित्वेन असमसर्वकारस्य शिक्षामन्त्री श्री एच.बी. शर्मा, अध्यक्षत्वेन नवदेहलीस्थ- श्रीलालबहादुर-शास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य कुलाधिपतिः न्यायमूर्तिः डॉ. मुकुन्दकामशर्मा, विशिष्टातिथित्वेन असमस्य नलबारीस्थ-के.बी.वी.एस. विश्वविद्यालयस्य कुलपतिः श्रीदीपकशर्मा च आसन्। नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यो राधावल्लभत्रिपाठी निष्कर्षभाषणमकरोत्। अस्य सम्पूर्णकार्यक्रमस्य संयोजनं डा. शुक्लामुखर्जी, डा. निरदा देवी डा. सुरेशचन्द्रबोरा च अकुर्वन्।



सङ्गोष्ठयां समापनसमारोहस्य किञ्चन दृश्यम्

भारतस्य पूर्वोत्तरराज्ये असमप्रान्ते समायोजितेयं सङ्गोष्ठी निश्चयेन अत्यन्तं सफला सङ्गोष्ठी आसीत्। 'भारतगौरव-आनन्दरामबडुआ-महोदयस्य संस्कृते योगदानम्' इत्यस्य विषयस्य विविधपक्षाः अस्मिन् कार्यक्रमे सम्यक्तया समुद्घाटिताः अभवन्।

## सङ्गोष्ठ्यङ्गतया समायोजित-सांस्कृतिककार्यक्रमस्य चित्रद्वयम्





## सम्पन्ना अखिलभारतीयप्राकृतभाषा-साहित्याध्ययनशाला



अध्ययनशालाया: उद्घाटनकार्यक्रमे मञ्चासीना: विद्वांस:

देहलीस्थ-भोगीलाललहेरचन्दप्राच्यविद्यासंस्थान-राष्ट्रियसंस्कृत-संस्थानयो: संयुक्तोपक्रमे २०.०५.२०१२ त: १०.०६.२०१२ दिनाङ्कं यावत् आहत्य द्वाविंशतिदिवसीया काचित् अखिलभारतीयग्रीष्मकालीन-प्राकृतभाषासाहित्याध्ययनशाला सोत्साहं समायोजिता। चतुर्विंशतितमेयम् अध्ययनशाला भोगीलाललहेरचन्दप्राच्यविद्यासंस्थानस्य भवने प्राचलत्। अध्ययनशालायामस्यां भारतवर्षाद् विदेशेभ्यश्च नैके विद्वांस: शोधार्थिनश्च समवेता: अभवन्।

२०.०५.२०१२ दिनाङ्के अध्ययनशालाया: अस्या: उद्घाटनसत्रे मुख्यातिथित्वेन भारतसर्वकार-संस्कृतिमन्त्रालयस्य संयुक्तसचिव: डा. वेनु.वी. (आई.ए.एस.), अध्यक्षत्वेन नवदेहलीस्थ-इन्दिरागान्धी-राष्ट्रियकलाकेन्द्रस्य संयुक्तसचिव: श्री वी.बी. प्यारेलाल: (आई.ए.एस.) च समुपस्थितौ आस्ताम्। उद्घाटनसत्रारम्भे भोगीलाललहेरचन्दप्राच्य-विद्यासंस्थानस्य निदेशक: फूलचन्दजैन: 'प्रेमी' स्वीयसंस्थानस्य प्राकृताध्ययनशालायाश्च परिचयपुरस्सरम् उद्देश्यानि समुपास्थापयत्। तत: संस्थानोपाध्यक्ष: डा. जितेन्द्र बी.शाह: समागतानामतिथीनां स्वागतं कुर्वन् प्राकृतभाषाविकासार्थं संस्थानस्य योगदानं प्रस्तुवन् प्राकृतवाङ्मयस्य वैशिष्ट्यं प्रास्तौत्। सत्रस्यास्य मुख्यातिथि: अध्यक्ष: च प्राकृतभाषा-साहित्ययो: विकासाय यथासम्भवं सहयोगं कर्तुम् उक्तवन्तौ।

अध्ययनशालायामस्याम् आचार्यदामोदरशास्त्रि-आचार्यजगतरामभट्टाचार्य-आचार्यधर्मचन्दजैन-आचार्यजितेन्द्रशाह-डा. कमलेशकुमारजैन-डा. अनेकान्तकुमारजैन-आचार्यफूलचन्दजैना: शिक्षणकार्यं सम्पादितवन्त:। नैके विशेषज्ञा: अपि अत्र स्वीयं व्याख्यानं प्रस्तुतवन्त:। तेषु विद्वत्सु आचार्यगयाचरणत्रिपाठि-डा. विजयशङ्करशुक्ल-आचार्यनिहालचन्द्रजैन-आचार्यसुदीपकुमारजैन-आचार्यजयपाल-विद्यालङ्कार-आचार्य: एच.सी. जैनादय: प्रमुखास्सन्ति। ०५.०६.२०१२ दिनाङ्के दिल्ली-दूरदर्शनस्य डी.डी. भारती-चैनले प्राकृतभाषाधारिता परिचर्चा 'मेरी बात' इति कार्यक्रमे प्रदर्शिता जाता। ०८.०६.२०१२ दिनाङ्के आकाशवाणीत: आचार्यस्य फूलचन्द्रजैनस्य साक्षात्कारकार्यक्रमोऽपि प्रसारितो जात:। कार्यशालान्ते समस्त-प्रतिभागिनां काचित् परीक्षापि समायोजिताऽभवत्। प्रारम्भिके पाठ्यक्रमे श्रीपङ्कजकुमारजैन-ब्र. समताजैन-वैभवश्रीवास्तवा: प्रथमद्वितीयतृतीयेति क्रमेण समुत्तीर्णा:। विशिष्टपाठ्यक्रमे श्रीधन्यकुमारजैन- अनिमेषप्रकाश-शान्तिसागरशिरहट्टी इत्येते प्रथमद्वितीयतृतीयस्थानानि यथाक्रमेण लब्धवन्त:।



समापनकार्यक्रमे पुरस्कारवितरणं कुर्वन् आचार्य: राधावल्लभत्रिपाठी

१०.०६.२०१२ दिनाङ्के अस्या: अध्ययनशालाया: समापनकार्यक्रम: समायोजित:। अस्मिन् समापनकार्यक्रमे मुख्यातिथित्वेन नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य कुलपति: आचार्य: राधावल्लभत्रिपाठी, अध्यक्षत्वेन नवदेहलीस्थ-आकाशवाणीकेन्द्रस्य निदेशक: श्रीलक्ष्मीशङ्करवाजपेयी विशिष्टातिथित्वेन नवदेहलीस्थ-राष्ट्रियसंस्कृतसंस्थानस्य कुलसचिव: आचार्य: के.बी. सुब्बरायुडु: च आसन्। कार्यक्रमारम्भे डा. जितेन्द्र बी.शाह:, आचार्य: फूलचन्दजैन:, श्रीराजकुमारजैन: जगतरामभट्टाचार्यादय: च स्वीयाभिप्रायान् प्राकटयन्। कार्यक्रमस्य मुख्यातिथि: आचार्य: राधावल्लभत्रिपाठी चिन्तनपरके गभीरे च व्याख्याने अकथयत् यद् 'भाषा, संस्कृतिधर्मदर्शनेभ्य: श्रेष्ठतरा भवति। भाषायामेव सर्वाणि तत्त्वानि समाहितानि भवन्ति। प्राकृतभाषासंरक्षणं वस्तुत: सम्पूर्णस्य राष्ट्रस्य संरक्षणमेव। संस्कृतज्ञानं प्राकृतात् ऋते न सम्भवति तथैव प्राकृतस्य ज्ञानं संस्कृतेन विना न सञ्जायते। उभेऽपि भाषे मिथ: पूरके।' तत: विशिष्टातिथि: आचार्य: सुब्बरायुडु: प्राकृतविकासविषये स्वीयाभिमतं प्रास्तौत्। श्रीलक्ष्मीशङ्करवाजपेयी प्राकृतभाषाया: जनभाषात्वस्य विषये अकथयत्। कार्यक्रमान्ते डा. धनेशजैन: धन्यवादं प्राकटयत्।

## पुरस्कृत: कुलपतिमहोदय:

राष्ट्रियसंस्कृतसंस्थानस्य कुलपति: आचार्य: राधावल्लभत्रिपाठी नवदेहलीस्थ-कुन्दकुन्दभारतीसंस्थया २२.०४.२०१२ दिनाङ्के 'आचार्यकुन्दकुन्दपुरस्कार:' इत्यनेन पुरस्कृत:। मुनिश्रेष्ठस्य विद्यानन्दमुनिराजस्य सान्निध्ये पूज्यस्वस्तिश्री-चारुकीर्तिभट्टारक-स्वामिना एकलक्षरूप्यकोऽयं पुरस्कार: आचार्याय राधावल्लभत्रिपाठिने समर्पित:। अत्रैव आचार्य: राधावल्लभत्रिपाठी 'प्राच्यविद्यामहार्णव'-विरुदेनापि अलंकृतोऽभूत्।

## आचार्याय सत्यव्रतशास्त्रिणे मानार्थः डाक्टरेट-उपाधिः



टोरिनोविश्वविद्यालयस्य विशिष्टदीक्षान्तसमारोहस्यावसरे आचार्यः सत्यव्रतशास्त्री अन्ये विद्वांसश्च

आचार्याय सत्यव्रतशास्त्रिमहोदयाय तत्साहित्यिकयोगदानाय देश-विदेशेभ्यो बहवः प्रतिष्ठिताः पुरस्काराः लब्धाः सन्ति। भारतीयज्ञानपीठपुरस्कारः, साहित्याकादमीपुरस्कारः, पद्मभूषणं, राष्ट्रपतिसम्मानपत्रं, वाचस्पतिपुरस्कारः, गीतारत्नपुरस्कारः, संस्कृतसेवासम्मानः, सरदारपटेलपुरस्कारः, लाइफ टाइम अचीवमेण्ट अवार्ड विद्यारत्नं, प्रथमान्ताराष्ट्रियहिमाद्रि-उत्तराचलसंस्कृतसम्मानः, महाकविकालिदाससंस्कृतजीवनव्रतिराष्ट्रियसम्मानः, इटलीस्थ-अन्ताराष्ट्रियोन्नतैशियाध्ययनसंस्थानतः सुवर्ण-पुरस्कारः, भारतीयकालिदाससमारोहपुरस्कारः इत्येवं पुरस्काराणां सम्मानानां च काचित् सुदीर्घा सूची वर्तते। अयं महोदयः बहुभ्यो विश्वविद्यालयेभ्यः मानार्थोपाधिभिः बहुधा सम्मानितः।



संस्थाने समायोजितस्य अभिनन्दनकार्यक्रमस्य किञ्चन दृश्यम्

साम्प्रतमयं महोदयः ०३.०५.२०१२ दिनाङ्के इटलीस्थ-टोरिनोविश्वविद्यालयस्य विशिष्टदीक्षान्तसमारोहे डाक्टरेट (Doctorate Honoris Causa) इति मानार्थोपाधिना सभाजितो वर्तते। एतस्य सम्माननस्य कृते राष्ट्रियसंस्कृतसंस्थाने आचार्यः सत्यव्रतशास्त्रिमहोदयः संस्थानस्य सारस्वतसभागारे समायोजिते एकस्मिन् विशिष्टे कार्यक्रमे कुलपतिप्रमुखैः संस्थानसदस्यैः अभिनन्दितः।

## हरिद्वारे अनौपचारिकसंस्कृतशिक्षकप्रशिक्षणवर्गः समायोजितः

हरिद्वारे अनौपचारिकसंस्कृतशिक्षकप्रशिक्षणवर्गः ०१.०६.२०१२ तः २१.०६.२०१२ दिनाङ्कपर्यन्तं संस्थानेन समायोजितः। तत्र प्रमुखवर्गसंयोजकरूपेण उत्तराखण्डसंस्कृतसंस्थानस्य सचिवः डा. बुद्धदेवशर्मा, प्रमुखशिक्षकरूपेण लखनऊपरिसरस्य उपाचार्यः डा. लक्ष्मीनिवासपाण्डेयः, व्याकरणशिक्षकरूपेण लखनऊपरिसरस्य उपाचार्यः डा. धनीन्द्रकुमारझाः, व्याकरणशिक्षकरूपेण तथा डा. शैलेशतिवारी, सम्भाषणशिक्षकरूपेण डा. प्रकाशचन्द्रपन्तः, डा. हरीशगुर्रानी प्रभृतिविद्वांसः आसन्।

वर्गस्य सम्पूर्तिसमारोहे केन्द्रीयसंसदीयकार्यमन्त्री श्रीहरीशरावतमहोदयः मुख्यातिथिरूपेण समागतः आसीत्। मन्त्रिमहोदयेन उत्तराखण्डराज्ये संस्कृतस्य द्वितीयराजभाषात्वं सत्कृत्य संस्कृतस्य संवर्द्धनदृष्ट्या इतोऽपि सर्वकारीयप्रयासान् विधातुं सङ्कल्पितम्। वर्गेऽस्मिन् अष्टषष्टिसंख्याकाः प्रशिक्षणार्थिनः आसन्।

## अर्वाचीनसंस्कृतपत्रिकायाः पञ्चत्रिंशद्वर्षाणि पूर्णानि

नवदेहलीस्थ-देववाणीपरिषत्संस्थया प्रकाशितस्य 'अर्वाचीनसंस्कृतम्' इति त्रैमासिकसंस्कृतपत्रस्य पञ्चत्रिंशत्तमवर्षपूर्त्यंकः अङ्कः राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिना आचार्यराधावल्लभत्रिपाठिना २५.०४.२०१२ तमे दिनाङ्के लोकार्पितः। लोकार्पणकार्यक्रमे संस्थानकुलपतिना उक्तं यद् 'अर्वाचीनसंस्कृतपत्रिका समकालीनसंस्कृतसाहित्यस्य प्रोन्नयनार्थं प्रचार-प्रसारार्थं च महतीं भूमिकां निर्वहति। एतादृशीनां पत्रिकाणाम् अन्तर्जाले निक्षेपणेन सम्पूर्णेऽपि विश्वे एतासाम् उपलब्धता भवितुं शक्नोति। राष्ट्रियसंस्कृतसंस्थानमस्यां दिशि पत्रिकायै सहयोगं कर्तुं शक्नोति।' अर्वाचीनसंस्कृतस्य प्रधानसम्पादकेन डा. रमाकान्तशुक्लेन सूचितं यत् १९७९ तमाद् वर्षाद् अद्यावधि प्रकाशितेषु अङ्केषु २४० शोधसमीक्षापरका लेखाः किञ्च ११४४ मौलिकरचनाः प्रकाशिता अभूवन्। सार्धद्विशतप्रायाणां लेखकानां सहयोगोऽस्यै पत्रिकायै सुलभो जातः।




कार्यक्रमे भाषमाणः डा. अभिनवशुक्लः, (मञ्चे वामतः) ऋषिराजपाठकः, रमाशुक्ला, राधावल्लभत्रिपाठी रमाकान्तशुक्लः च

अस्मिन्नवसरे डा. गोपीरमणमिश्र-डा.रमाकान्तपाण्डेय-डा. अजयकुमारमिश्र-डा. सच्चिदानन्दतिवारिभिः अर्वाचीनसंस्कृतस्य पाठकत्वेन लेखकत्वेन च स्वानुभवाः प्रकटिताः। समारोहेऽस्मिन् संस्कृतस्य अनेके विद्वांसः अधिकारिणश्चोपातिष्ठन्। अर्वाचीनसंस्कृतस्य संयुक्तसम्पादकेन डा. अभिनवशुक्लेन ज्ञापितं यत्पत्रिकायामस्यां नवीनतमाः घटनाः, साहित्यिकप्रवृत्तयश्च समावेश्यन्ते। तेन लेखकेभ्यः, पाठकेभ्यो ग्राहकेभ्यश्च धन्यवादा अर्पिताः। समारोहस्यास्य आध्यक्ष्यं देववाणी-परिषदुपाध्यक्षया श्रीमत्या रमाशुक्लया निर्व्यूढम्। सञ्चालनं परिषत्सहसचिवेन श्रीऋषिराजपाठकेन कृतम्।




कार्यक्रमे भाषमाणः डॉ. सत्यदेवचौधरी

## अभिनन्दिताः राष्ट्रपतिसम्मानिताः विद्वांसः

नवदेहलीस्थ-देववाणीपरिषदा भारतीयसंस्कृतपत्रकारसंघेन च १९.०६.२०१२ तमे दिनाङ्के देहल्यां 'होटलजनपथ' इत्यत्र राष्ट्रपतिसम्मानित-संस्कृतविदुषाम् अभिनन्दनं कृतम्। भारतीयसंस्कृतपत्रकारसंघस्य अध्यक्षेण किञ्च देववाणीपरिषदो महासचिवेन डा. रमाकान्तशुक्लेन लब्धसम्मान-प्रमाणपत्रेभ्यः प्रौढविद्वद्भ्यः किञ्च अधिगतमहर्षिबादरायणव्याससम्मानेभ्यो युवविद्वद्भ्यः परिषत्प्रकाशितसाहित्यसमर्पणपुरस्सरम् अभिनन्दनं व्याहृतम्। तेन प्रोक्तं यत् राष्ट्रपतिसम्मानः संस्कृतस्य सततवरिवस्यायाः सम्मानोऽस्ति। आचार्यशुक्लेन महामहिमराष्ट्रपतिना सम्मानप्रमाणपत्रेण सभाजितस्य 'विश्वसंस्कृत'मिति त्रैमासिकपत्रस्य सम्पादकस्य आचार्य इन्द्रदत्त उनियालस्य, 'गुञ्जारव'त्रैमासिकपत्रिकायाः प्रधानसम्पादकस्य डा. देवीप्रसादखाण्डेराव-खरवण्डीकरस्य, 'सुधर्मा'दैनिकपत्रस्य गौरवसम्पादकस्य डा. एच. वी. नागराजरावस्य, महर्षिबादरायणव्याससम्मानेनालंकृतस्य किञ्च 'पद्यबन्धे'ति सद्यःप्रकाशितायाः पत्रिकायाः सम्पादकस्य डा. धर्मेन्द्रकुमारसिंहदेवस्य च अभिनन्दनं कृतम्। लब्धसम्मानप्रमाणपत्रेषु अभिनन्दितेषु विद्वत्सु आचार्यः सत्यदेवचौधरी, आचार्यः अङ्गराजचौधरी, आचार्यः जयदत्त उप्रैती, डा. गणेशदत्तशर्मा, डा. नोदनाथमिश्रः इत्यादय आसन्। प्राप्तमहर्षिबादरायणसम्मानेषु युवविद्वत्सु डा. ब्रजभूषण ओझा, डा. सम्पदानन्दमिश्रः, डा. वीरनारायण एन. के. पाण्डुरङ्गी उपातिष्ठन्।

स्वाभिप्रायं प्रकटीकुर्वता 'गुञ्जारव'स्य सम्पादकेन डा. खरवण्डीकरेणोक्तं यत्संस्कृतपत्रिकाप्रकाशनम् असिधाराव्रतपालनम् इव आभाति। 'विश्वसंस्कृत'-सम्पादकेन आचार्यइन्द्रदत्त-उनियालेनोक्तं यद्यपि संस्कृतपत्रिकाप्रकाशनार्थम् अर्थस्य अभावो नास्ति। तथापि स्वाभिमानिनः सम्पादका आत्मार्थे धनं कस्मादपि न याचन्ते। तथापि अयाचितव्रतपालनतत्पराः तपस्विनः संस्कृतस्य पत्रिकाः प्रकाशयन्तः आत्मतोषमनुभवन्ति। डा. पाण्डुरङ्गिमहोदयेन कम्प्यूटरे संस्कृतस्य उपयोगस्य आवश्यकता रेखाङ्किता। डा. सम्पदानन्दमिश्रेण संस्कृतस्य विश्वव्यापिप्रचारार्थमुपायाः प्रस्तुताः। अभिनन्दनसमारोहेऽस्मिन् भारतस्य विविधेभ्यः प्रदेशेभ्यः समायाताः विद्वांसो विदुष्यश्च समुपातिष्ठन्। अस्मिन्नवसरे उपस्थितेभ्यः अतिथिभ्यः अपि 'भाति मे भारतम्' नाम काव्यम् उपहृतमभूत्।

कार्यक्रमस्य सञ्चालनं भारतीयसंस्कृतपत्रकारसंघस्य महासचिवेन डा. बलदेवानन्दसागरेण कृतम्। धन्यवादज्ञापनं देववाणी-परिषदः सहसचिवेन श्रीमता ऋषिराजपाठकेन कृतम्। विद्वदभिनन्दनसमारोहस्य आध्यक्ष्यं श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठस्य पूर्वकुलपतिना आचार्यश्रीधरवासिष्ठेन निर्व्यूढम्।

## मुक्तस्वाध्यायपीठस्य अभिकल्पसमितेः उपवेशनं सम्पन्नम्

नवदेहल्यां संस्थानमुख्यालये १५.०५.२०१२ दिनाङ्के मुक्तस्वाध्यायपीठस्य अभिकल्पसमितेः उपवेशनं सम्पन्नम्। उपवेशनेऽस्मिन् अभिकल्पसमितेः इमे पदाधिकारिणः सदस्याश्च उपस्थिता आसन् - १. आचार्यः राधावल्लभत्रिपाठी (अध्यक्षः), २. आचार्यः सी.आर.के. मूर्तिः (सदस्यः), आचार्या नलिनी ए. लेले (सदस्या), आचार्यः सूबेसिंहः (सदस्यः), आचार्यः नरेन्द्र अवस्थी (सदस्यः), आचार्यः नरेशदाधीचः (सदस्यः), आचार्यः जी गङ्गन्ना (सदस्यः), आचार्यः रामलखनपाण्डेयः (सदस्यः), आचार्यः के.बी. सुब्बरायुडुः (सदस्यः), डा. रमाकान्तपाण्डेयः (सदस्यसचिवः) च। एतेषाम् अतिरिच्य संस्थानाधिकारिणः मुक्तस्वाध्यायपीठप्राध्यापकाश्च उपवेशनेऽस्मिन् सहभागिनः आसन्। अभिकल्प-समित्युपवेशनेऽस्मिन् नैके प्रस्तावाः विमृष्टाः निर्णिताश्च।

अध्येतृसहायतार्थम् 'आन लाइन हेल्प कार्नर प्रोग्राम' इत्यस्य व्यवस्था, ज्योतिष-व्याकरणविषययोः कृते अतिथिप्राध्यापकानां नियोजनं, मुक्तस्वाध्यायपीठेन निर्मितायां स्वाध्यायसामग्र्यां संशोधनं, नूतनपाठ्यक्रमाणां संरचना इत्यादिविषयेषु अभिकल्पसमित्युपवेशनेऽस्मिन् निर्णयाः स्वीकृताः।



उपवेशने भाषमाणः डॉ. रमाकान्तपाण्डेयः



कार्यशालायां भाषमाणः आचार्यः राधावल्लभत्रिपाठी

## प्रवृत्ता प्राकृत-संस्कृतच्छायासम्पादनकार्यशाला

नवदेहली-राष्ट्रियसंस्कृतसंस्थानसारस्वतसभागारे १४-२१, मई, २०१२ मिते काले सप्तदिवसीया काचित् प्राकृतसंस्कृतच्छायासम्पादनकार्यशाला सम्पन्ना। अस्यां कार्यशालायां प्राकृत-पालि-संस्कृत-भाषाविज्ञानविषयाणां विशेषज्ञाः समुपस्थाय शोधाध्येतॄन् बोधिवन्तः। इमे विशेषज्ञाः कार्यशालायां समुपस्थिता आसन्- आचार्यजानकीप्रसादद्विवेदी (वाराणसी), आचार्यः दामोदरशास्त्री (लाडनूं), डा. जयकुमारजैनः (मुजफ्फरनगरम्), आचार्यः हरिशङ्करपाण्डेयः (वाराणसी), आचार्यः कमलेशकुमारजैनः (वाराणसी), आचार्यः दीनानाथशर्मा (अहमदाबाद), आचार्यः जगतरामभट्टाचार्यः (लाडनूं), आचार्यः वृषभप्रसादजैनः (लखनऊ), आचार्यः सङ्घसेनसिंहः (दिल्ली) चेति। कार्यशालायामस्यां पालि-प्राकृत-परियोजनासम्बद्धस्य संस्कृतच्छायाकार्यस्य समीक्षणं सम्पादनं च अजायत। संस्थानमुख्यालये, जयपुरपरिसरे लखनऊपरिसरे च विकासाधिकारित्वेन शोधाध्येतृत्वेन च कार्यं कुर्वतां समस्यानां समाधानमपि कार्यशालायायमस्यां जातम्।



कार्यशालायाः समापनावसरस्य किञ्चन दृश्यम्

अस्याः कार्यशालायाः समापनसमारोहः २१ मई, २०१२ दिनाङ्के डा. गोपीरमणमिश्रस्याध्यक्ष्ये सम्पन्नः। कार्यक्रमस्य मुख्यातिथिः आचार्यः अभिराजराजेन्द्रमिश्रः प्राकृतसंस्कृतयोः अन्तःसम्बन्धं प्रकाशयन् प्राकृतग्रन्थानां संस्कृतच्छायायाः आवश्यकतां प्रत्यपादयत्। आचार्यरमाकान्तशुक्लोऽपि पालि-प्राकृतयोः प्रचारविषयकान् विचारान् प्रास्तौत्। कार्यशालायां समुपस्थिताः विद्वांसः 'संस्थानमुख्यालये प्राकृतशोधदृष्ट्या कश्चन प्राकृतविभागः उद्घाटनीयः' इति प्रत्यपादयन्।

## राष्ट्रियसंस्कृतसंस्थानस्य अन्ताराष्ट्रियस्तरीयकेन्द्रीयविश्वविद्यालयत्वेन संवर्द्धनाय विशेषज्ञसमितिः घटिता

भारतीयसंस्कृतपत्रकारसंघस्य अध्यक्षः डा. रमाकान्तशुक्लः मानवसंसाधनविकासमन्त्रालयेन १७.०४.२०१२ दिनाङ्कितपत्रेण सूचितोऽस्ति यत् मन्त्रालयेन राष्ट्रियसंस्कृतसंस्थानस्य अन्ताराष्ट्रियस्तरीयकेन्द्रीयविश्वविद्यालयत्वनिर्धारणार्थमेका विशेषज्ञसमितिः घटिता, या मासत्रयेण स्वसंस्तुतिं दातुमपेक्षितास्ति। तदनन्तरमस्यां दिशि अपरेऽपि प्रयासा विधास्यन्ते। स्मरणीयं विद्यते यत् १३.०७.२०११ तमे किञ्च ०७.०३.२०१२ तमे दिनाङ्के भारतीयसंस्कृतपत्रकारसंघस्य अध्यक्षेण डा. शुक्लेन मानवसंसाधनविकासमन्त्री श्रीकपिलसिब्बलः राष्ट्रियसंस्कृतसंस्थानं संसदि अधिनियमपारणपुरस्सरं केन्द्रीयविश्वविद्यालयत्वेन उद्घोषयितुमनुरुद्ध आसीत्। अत्रान्तरे सूत्रैर्ज्ञायते यद् विशेषज्ञ-समित्या स्वप्रतिवेदनं संस्तुतिश्च मन्त्रालयाय प्रेषिते स्तः।



कार्यशालायाः किञ्चन समूहचित्रम्

## दूरस्थशिक्षापाठलेखन-कार्यशाला आयोजिता

नवदेहल्यां मुक्तस्वाध्याय-पीठेन ०१.०५.२०१२ तः १०.०५.२०१२ दिनाङ्कं यावत् नव-देहलीस्थ-महाशय-चूनीलाल-सरस्वती - बालविद्यामन्दिरे दशदिवसीया पाठलेखन-कार्यशाला समायोजिता। प्राक्शास्त्रि-शास्त्रि-आचार्यकक्ष्याणां साहित्य-व्याकरण-फलितज्यौतिषविषयाणां द्वितीयवर्षस्य पाठ्यक्रमस्य लेखनं कार्यशालायामस्यां जातम्।

अस्यां कार्यशालायां संस्थानपरिसराणां प्राध्यापकाः अन्येषां संस्कृतमहाविद्यालयानां शिक्षकाश्च सम्भूय मुक्तस्वाध्यायपीठस्य पाठ्यसामग्र्यः स्वाध्यायविधिना रचितवन्तः।

## स्वाध्यायकेन्द्राणां संयोजकानां उपवेशनं प्रवृत्तम्

१०.०६.२०१२ दिनाङ्के राष्ट्रियसंस्कृत-संस्थानान्तर्गतस्य मुक्तस्वाध्यायपीठस्य स्वाध्याय-केन्द्राणां संयोजकानाम् उपवेशनं कुलसचिवमहोदयस्य आध्यक्ष्ये सम्पन्नम्। अस्मिन् उपवेशने संस्थानस्य विविधपरिसरस्थितस्वाध्यायकेन्द्रेभ्यः संयोजकः समुपस्थिताः। ते स्वीयसमस्याः अस्मिन् उपवेशने प्राकटयन्। ततः मुक्तस्वाध्यायपीठस्वाध्यायकेन्द्रेषु विद्यमानानां समस्यानां समाधानं कथं भवेदिति विचारो जातः। प्रदत्तकार्य-अध्यापन-सम्पर्ककक्ष्या-इत्यादिविषयेषु अपि उपवेशनेऽस्मिन् चर्चा जाता। भविष्यगामियोजनाविषयेऽपि अत्र सुष्ठु चर्चा संवृता।

## कुलपतेः दैनन्दिनी

| | |
|---|---|
| ०२.०४.२०१२ | दिल्लीविश्वविद्यालयेन समायोजितायाम् आचार्यनगेन्द्रस्मृतिव्याख्यानमालायां व्याख्यानम्। |
| ०४.०४.२०१२ | मानवसंसाधनविकासमन्त्रालयस्य भाषिकसंयुक्तसचिवेन सह उपवेशनम्। |
| ०५.०४.२०१२ | राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदो निरीक्षणविषये संस्थानाधिकारिभिः सह उपवेशनम्। सम्मानकार्यक्रमे व्याख्यानं च। |
| ०९.०४.२०१२ | राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदो संयुक्तनिरीक्षणदलेन सह उपवेशनम्। तत्रैव राष्ट्रियसंस्कृतसंस्थानविषये पावर-प्वाइंट-प्रस्तुतिश्च। |
| ११.०४.२०१२ | मानवसंसाधनविकासमन्त्रालयस्य भाषिकसंयुक्तसचिवेन सह उपवेशनम्। |
| १३.०४.२०१२ | दूरदर्शनभवने संस्कृतवार्ताप्रस्तोतृपदस्य चयनसमितौ समुपस्थितिः। |
| २३.०४.२०१२ | छात्रवृत्तिसमीक्षणसमितेः उपवेशने आध्यक्ष्यम्। |
| २६.०४.२०१२ | राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदः संयुक्तनिरीक्षणदलेन सह उपवेशनम्। |
| २७.०४.२०१२ | वित्तसमिति-प्रबन्धनमण्डलयोः उपवेशने आध्यक्ष्यम्। |
| ३०.०४.२०१२ | राष्ट्रियपाण्डुलिपिमिशनविषयके उपवेशने समुपस्थितिः। |
| ०१.०५.२०१२ | राष्ट्रियसंस्कृतसंस्थानस्य प्रकाशनसमितेः उपवेशने आध्यक्ष्यम्। अन्ताराष्ट्रियसंस्कृताध्ययनसमवायस्य साधारणसभया परिगृहीतप्रस्तावानां विषये विचारयितुं मानवसंसाधनविकासमन्त्रालयेन घटितायाः विशेषज्ञसमितेः उपवेशनस्य आयोजनं सञ्चालनं च। |
| ०२.०५.२०१२ | राष्ट्रियसंस्कृतसंस्थानस्य ई-वेबविषयकोपवेशने आध्यक्ष्यम्। |
| ०३.०५.२०१२ | राष्ट्रियसंस्कृतसंस्थानस्य अनुदानसमितेः संक्षेपस्य प्रस्तुतिः। |
| ०४.०५.२०१२ | राष्ट्रियसंस्कृतसंस्थानस्य अनुदानसमित्युपवेशने समुपस्थितिः। |
| ०७-०८.०५.२०१२ | आदर्शसंस्कृतमहाविद्यालयानां केरियर-प्रगति-योजनान्तर्गततया पदोन्नतिविषयके चयनसमित्युपवेशने आध्यक्ष्यम्। |
| १०.०५.२०१२ | नवदेहलीस्थ-भारतीयविदेशव्यापारसंस्थानस्य भवने समायोजितायां राष्ट्रियप्राकृतसङ्गोष्ठ्यां मुख्यातिथित्वम्। |
| ११.०५.२०१२ | राष्ट्रियसंस्कृतसंस्थानेन समायोजिते कविभास्करी-कार्यक्रमे आध्यक्ष्यम्। नवदेहलीस्थ-नीलाञ्चल-न्यासेन त्रिवेणीसम्मेलनकक्षे समायोजिते "एन् इवनिंग ऑफ क्लासिकल म्यूजिक-फ्ल्युट" इति कार्यक्रमे मुख्यातिथिरूपेण उपस्थितिः। |
| १३.०५.२०१२ | लखनऊस्थ-अखिलभारतीयसंस्कृतपरिषदा समायोजितायां पाण्डुलिपिविज्ञानपुरालिपिशास्त्रयोः कार्यशालायां समापनसमारोहे उपस्थितिः। लखनऊपरिसरेण समायोजितायां सङ्गोष्ठ्यां समुपस्थितिः। |
| १४.०५.२०१२ | नवदेहलीस्थ-टैगोरगार्डने केन्द्रीयविद्यालयस्य विद्यालयप्रबन्धसमितेः उपवेशने आध्यक्ष्यम्। नवदेहलीस्थ-जवाहरलालनेहरुविश्वविद्यालये चयनसमित्युपवेशने आध्यक्ष्यम्। मानवसंसाधनविकासमन्त्रालयस्य उच्चशिक्षा-सचिवस्य आध्यक्ष्ये समायोजिते राष्ट्रियसंस्कृतपरिषदः पुनर्गठनविषयके उपवेशने उपस्थितिः। |
| १५.०५.२०१२ | राष्ट्रियसंस्कृतसंस्थानस्य सम्मेलनप्रकोष्ठे पञ्चदश विश्वसंस्कृतसम्मेलनस्य प्रस्तावेषु विचारं विधातुं समायोजिते उपवेशने समुपस्थितिः। |
| १६.०५.२०१२ | भोपालपरिसरेण समायोजिते काव्यपाठ-कार्यक्रमे आध्यक्ष्यम्। |
| २१-२२.०५.२०१२ | गुवाहाट्यां 'आनन्दरामबडुआमहोदयस्य संस्कृते योगदानम्' इति विषयाधारितायां सङ्गोष्ठ्यां समुपस्थितिः, उद्घाटनसत्रे बीजभाषणं च। |
| २३.०५.२०१२ | केरियर-उन्नति-योजना-उपवेशने आध्यक्ष्यं शैक्षणिकपदानां समीक्षणं च। |
| २६.०५.२०१२ | बेङ्गलूरुस्थ-पूर्णप्रज्ञासंशोधनमन्दिरेण समायोजितायाः कार्यशालायाः सम्पूर्तिसमारोहे उपस्थितिः विशिष्टव्याख्यानं च। |
| २८.०५.२०१२ | पञ्चदशविश्वसंस्कृतसम्मेलनस्य विशेषज्ञसमित्या घटितया उपसमित्या स्वीकृतप्रस्तावानां विषये माननीय मानवसंसाधनविकासमन्त्रिभिः सह तन्निवासे उपवेशनम्। |
| ३०.०५.२०१२ | माननीय-मानवसंसाधनविकासमन्त्रिभिः सह तत्कार्यालये उपवेशनम्। |
| ३१.०५.२०१२ | पञ्चदश विश्वसंस्कृतसम्मेलनविषये स्वीकृतप्रस्तावानां विशेषज्ञसमितेः उपवेशने उपस्थितिः। संस्थानकर्मचारिणः श्रीनवलसिंहस्य सेवानिवृत्तिकार्यक्रमे आध्यक्ष्यम्। |
| ०१.०६.२०१२ | अन्ताराष्ट्रियसंस्कृताध्ययनसमवायस्य साधारणसभया स्वीकृतप्रस्तावानां विषये विचारयितुं मानवसंसाधनविकास-मन्त्रालयेन घटितायाः विशेषज्ञसमितेः निर्मित-समापकविवरणपत्रं समर्पितम्। |

| | |
|---|---|
| ०२.०६.२०१२ | कर्णाटके मङ्गलोरे 'सोसायटी फॉर प्रमोशन ऑफ इण्डियन क्लासिकल म्युजिक एण्ड कल्चर अमंगस्ट यूथ' द्वारा समायोजिते राष्ट्रियसम्मेलने उपस्थिति:। |
| ०३.०६.२०१२ | शृङ्गेरीपरिसरे समायोजितायां राष्ट्रियकार्यशालायां व्याख्यानम्। |
| ०७.०६.२०१२ | मानवसंसाधनविकासमन्त्रालयस्य उच्चशिक्षासचिवेन सह संस्कृतविद्यालयानां संस्थानेन सम्बद्धताविषये उपवेशनम्। संस्थानाधिकारिभि: सह हिन्द्या: कार्यालयीयोपयोगसम्बद्धे उपवेशने आध्यक्ष्यम्। |
| ०८.०६.२०१२ | लखनऊनगरे भारतीयदार्शनिकानुसन्धानपरिषदा समायोजिताया: कश्मीरशैवदर्शनविषयककार्यशालाया: सम्पूर्तिसमारोहे आध्यक्ष्यं समापनभाषणं च। |
| १०.०६.२०१२ | नवदेहलीस्थ-भोगीलाललहेरचन्दप्राच्यविद्यासंस्थाने २४ तमाया: अखिलभारतीयप्राकृतभाषासाहित्य-अध्ययनशालाया: सम्पूर्तिसमारोहे मुख्यातिथित्वम्। अनौपचारिकसंस्कृतशिक्षणस्य उपवेशने उपस्थिति:। |
| ११.०६.२०१२ | प्राचार्याणाम् उपवेशने आध्यक्ष्यम्। |
| १५.०६.२०१२ | प्रसारभारत्या समायोजिते संस्कृतस्य आकस्मिक्-सहायकसम्पादकपदस्य पैनलनिर्माणविषयकोपवेशने उपस्थिति:। |
| १९.०६.२०१२ | राष्ट्रपतिभवने राष्ट्रपतिसम्मान-महर्षिबादरायणव्याससम्मान-समारोहे उपस्थिति:। |
| २२.०६.२०१२ | मध्यप्रदेशस्य सागरविश्वविद्यालये वाक्परीक्षा सञ्चालिता। |
| २५.०६.२०१२ | नवदेहलीस्थ-विज्ञानभवने माननीयमानवसंसाधनविकासमन्त्रिणाम् आध्यक्ष्ये आयोजिते मानितविश्वविद्यालयानां कुलपतीनाम् उपवेशने उपस्थिति:। |
| २६.०६.२०१२ | मानवसंसाधनविकासमन्त्रालयस्य भाषिकसचिवस्य आध्यक्ष्ये २०१२ वर्षस्य राष्ट्रपति-सम्मान-परीक्षणसमिते: उपवेशने उपस्थिति:। |
| २८.०६.२०१२ | राष्ट्रियसंस्कृतसंस्थानस्य वित्तसमिते: प्रबन्धनमण्डलस्य च उपवेशने आध्यक्ष्यम्। |
| २९.०६.२०१२ | राष्ट्रियसंस्कृतसंस्थानस्य शैक्षणिकपरिषद: उपवेशने आध्यक्ष्यम्। संस्थानकर्मचारिण: श्रीकिशोरीठाकुरस्य सेवानिवृत्तिकार्यक्रमे आध्यक्ष्यम्। विवेकानन्द-अन्ताराष्ट्रिय-प्रतिष्ठानस्य ई.पू. २०००-७००० त: प्राचीनघटनानां वैज्ञानिकतिथिनिर्धारणविषयकायां मासिकपरिचर्चायाम् उपस्थिति:। |

## परीक्षापरिणाम: समुद्घोषित:

राष्ट्रियसंस्कृतसंस्थानस्य परीक्षानुभागेन २०११-२०१२ वर्षस्य कृते समायोजितपरीक्षाया: (वार्षिकपरीक्षाया: सत्रार्द्धपरीक्षायाश्च) परिणाम: समुद्घोषित: वर्तते। स: परिणाम: इत्थं वर्तते-

### वार्षिकपरीक्षा

| क्रमाङ्क: | परिणामतिथि: | कक्ष्या | परीक्षार्थिन: | उत्तीर्णा: | अनुत्तीर्णा: | प्रतिशतता |
|---|---|---|---|---|---|---|
| १. | ०५.०६.१२ | प्रथमा-III | ०१९० | १७६ | ०२ | ९२.६३% |
| २. | ०५.०६.१२ | पूर्वमध्यमा-II | ११२१ | ९६३ | ६८ | ८५.९०% |
| ३. | ०५.०६.१२ | प्राक्शास्त्री-II | १०४० | ९४८ | २४ | ९१.१५% |
| ४. | ०५.०६.१२ | उत्तरमध्यमा-II | ०३५५ | ३३६ | ०२ | ९४.६४% |
| ५. | २५.०६.१२ | शास्त्री-I | १५०५ | १२२४ | २३ | ८१.३८% |
| ६. | २७.०६.१२ | शास्त्री-II | १५७५ | १४३२ | १४ | ९१.०३% |
| ७. | २३.०६.१२ | शास्त्री-III | १३९५ | १२६९ | ३१ | ९१.२२% |
| ८. | २१.०६.१२ | आचार्य-I | १०८३ | ९७२ | १० | ९२.८३% |
| ९. | २१.०६.१२ | आचार्य-II | ८५० | ७४० | ११ | ९२.१५% |
| १०. | १२.०६.१२ | शिक्षाशास्त्री | ७३१ | ७३१ | ०० | १००% |
| ११. | ०२.०७.१२ | शिक्षाचार्य: | ६१ | ६१ | ०० | १००% |

### सत्रार्द्धपरीक्षा

| क्रमाङ्क: | परिणामतिथि: | कक्ष्या | परीक्षार्थिन: | उत्तीर्णा: | अनुत्तीर्णा: | प्रतिशतता |
|---|---|---|---|---|---|---|
| १२. | १४.०७.१२ | शास्त्री-II | ५७५ | ३९८ | ०५ | ६८% |
| १३. | १४.०७.१२ | आचार्य-II | ४४९ | ३३९ | ०५ | ६८% |

# संस्थानविदुषां क्रियाकलापाः उपलब्धयश्च

**आचार्यहरेकृष्णमहापात्रः** – बलाहारस्थ-श्रीवेदव्यासपरिसरस्य परिसरप्राचार्यः विद्वत्परिषद् (Academic Council) इत्यत्र २९.०६.२०१२ दिनाङ्के संस्थानस्य मुख्यालये अधिवेशने योगदानं समपादयत्।

**डा. एस.राधा** – १२.०६.२०१२ दिनाङ्के शृङ्गेरीस्थ-श्रीराजीवगान्धीपरिसरस्य प्राचार्यपदे कार्यभारं स्वीकृतवती।

**डा. बनमाली विश्वालः** – २५.०५.२०१२ तमे दिनाङ्के गङ्गानाथ-झा-परिसरे संस्कृतवाङ्मये जगन्नाथतत्त्वम् इति विषयमधिकृत्य विशिष्टव्याख्यानं प्रस्तुतवान्। राष्ट्रियसंस्कृतसंस्थान-संस्कृतसंवर्धनप्रतिष्ठानयोः संयुक्ततत्त्वावधाने राष्ट्रियसंस्कृतसंस्थानस्य शृङ्गेरिस्थे राजीवगान्धीपरिसरे २८.०५.२०१२ तः ०६.०६.२०१२ यावद् आयोजितायाम् अखिलभारतीयसंस्कृतलेखनानुवाद-कौशलप्रशिक्षणकार्यशालायां प्रशिक्षकरूपेण भागं गृहीत्वा नूतनाभिव्यक्तये शब्दान्वेषणं शब्दनिर्माणञ्च (सम्भावना: समस्याश्च), महाभाष्ये लोकोक्तयः लोकन्यायाश्च, भाण-प्रहसनेषु विशिष्टोक्तयः तथा संस्कृते कथालेखनकौशलम् इति विषयान् अधिकृत्य चत्वारि व्याख्यानानि प्रस्तुतवान्।

**डॉ. दाशगौरप्रिया** – बलाहारस्थ-श्रीवेदव्यासपरिसरस्य प्राध्यापिकेयं राष्ट्रियसंस्कृतसंस्थानस्य प्रबन्धनसमितौ (B.O.M) इत्यत्र सदस्यत्वेन निर्वाचिता, सा प्रबन्धनसमिते अप्रैल-जूनमासयोः उपवेशने च स्वीयं योगदानमकरोत्।

**डॉ. विजयपालशास्त्री** – बलाहारस्थ-श्रीवेदव्यासपरिसरस्य प्राध्यापकोऽयं गुजरातस्य सूरतनगरे ०४.०६.२०१२ तः ०८.०६.२०१२ दिनाङ्कं पर्यन्तं प्रचलिते कार्यक्रमे सिद्धहेमशब्दानुशासनब्रहन्यासस्य गूढस्थलानां विश्लेषणात्मकं व्याख्यानं प्रादात्। चोटीपुरस्थ-जूनमासस्य १०.०६.२०१२ तः १५.०६. २०१२ पर्यन्तं श्रीमद्दयानन्दकन्यागुरुकुलम् उत्तरप्रदेशराज्यप्रचलिते कार्यक्रमे कारकसम्बन्धोद्योतविषये व्याख्यानम् अयच्छत्।

**डॉ. सुज्ञानकुमारमाहान्तिः** – बलाहारस्थ-श्रीवेदव्यासपरिसरस्य प्राध्यापकोऽयं मईमासस्य अष्टाविंशतिदिनाङ्कतः जूनमासस्य षष्ठदिनाङ्कपर्यन्तं शृंगेरीस्थ-राजीवगान्धीपरिसरे प्रचलितायां कार्यशालायाम् अध्यापकत्वेन भागम् अगृह्णीत्।

**डॉ. मधुकेश्वरभट्टः** – बलाहारस्थ-श्रीवेदव्यासपरिसरस्य प्राध्यापकोऽयं मईमासस्य अष्टाविंशतिदिनाङ्कतः जूनमासस्य षष्ठदिनाङ्कपर्यन्तं शृंगेरीस्थ-राजीवगान्धीपरिसरे प्रचलितायां कार्यशालायाम् अध्यापकत्वेन भागम् अगृह्णीत्।

**आचार्यः विजयकुमारजैनः** – लखनऊपरिसरस्य बौद्धदर्शनविभागाध्यक्षोऽयं ११.०५.२०१२ दिनाङ्के श्रीलालबहादुरशास्त्रिराष्ट्रिय- संस्कृतविद्यापीठे समायोजितायां राष्ट्रियप्राकृतसङ्गोष्ठ्यां 'प्राकृत की प्राचीनता एवं माहात्म्य' इत्यस्मिन् विषये शोधलेखं प्रास्तौत्। इदमिदानीमेव अस्य सम्पादकत्वे 'तत्त्वार्थसूत्रानुशीलनम्' इति कश्चन ग्रन्थोऽपि प्रकाशितः।

**डॉ. अवनीशः अग्रवालः** – लखनऊपरिसरस्य शिक्षाशास्त्रविभागे उपाचार्या इयं 'समाजबोधे'त्यस्याः षाण्मासिकपत्रिकायाः सम्पादनमण्डले सदस्यतां गृहीतवती। जूनमासि एव अस्यामेव पत्रिकायां स्वनिर्देशिताधिगमविषये अस्याः महोदयायाः शोधलेखमपि प्रकाशितम्। एषा महोदया १९.०५.२०१२ तः १८. ०५.२०१२ पर्यन्तं लखनऊस्थ-नूरमंजिलमनोचिकित्साकेन्द्रे नैदानिकपरामर्शकार्यक्रमेऽपि भागं लब्धवती।

**डा. ब्रजभूषण ओझाः** – लखनऊपरिसरस्य व्याकरणविभागे सहायकाचार्योऽयं राष्ट्रपतिभवने १९.०६.२०१२ दिनाङ्के भारतसंघस्य महामहिमराष्ट्रपतिमहोदयानां करकमलेभ्यो महर्षिबादरायणव्यासपुरस्कारं प्राप्तवान्। अयं २८.०५.२०१२ तः ०६.०६.२०१२ दिनाङ्कं यावत् शृङ्गेरीपरिसरे समायोजितायां लेखनानुवादकौशलप्रशिक्षणकार्यशालायां व्यावहारिकव्याकरणस्य प्रशिक्षणम् अददात्।

**प्रो. रामलखनपाण्डेय-डॉ.धनीन्द्रकुमारझा-डॉ.श्यामदेवमिश्र-श्रीकुलदीपशर्माणः** – देहल्यां मईमासस्य एकदिनाङ्कतः समायोजितायां मुक्तस्वाध्यायकेन्द्रस्य दशदिवसीयपाठलेखनकार्यशालायां लखनऊपरिसरपक्षतः इमें प्राध्यापकाः प्रो.रामलखनपाण्डेयः (साहित्यवर्गे), डॉ.धनीन्द्रकुमारझा (व्याकरणवर्गे) डॉ.श्यामदेवमिश्रः (ज्योतिषवर्गे) श्रीकुलदीपशर्मा (व्याकरणवर्गे) च भागमगृह्णन्।

**डा. अवधेशकुमारचौबे** – लखनऊपरिसरस्य बौद्धदर्शनविभागे उपाचार्योऽयं २९.०६.२०१२ दिनाङ्के हिमाचलप्रदेशविश्वविद्यालये विश्वविद्यालयानुदानायोगेन प्रवर्तिते 'बौद्ध-अध्ययन-केन्द्रे' सदस्यरूपेण सहभागिता स्नातकोत्तरस्तरे च बौद्ध-अध्ययनस्य (डिप्लोमा) पाठ्यक्रमनिर्माणम् अकरोत्। ३०.०६.२०१२ दिनाङ्के शिमलानगरस्य राज्यसंग्रहालये Universal message of the Buddha इत्यस्मिन् विषये व्याख्यानं प्रादात्। अपरस्मिन् दिवसे तत्रैव गेटे-थियेटर् इत्यस्मिन् स्थले साहित्यकाराणां सङ्गोष्ठ्याम् आध्यक्ष्यमादाय 'प्रवृत्तबौद्धसम्प्रदायः' इत्यस्मिन् विषये व्याख्यानं प्रास्तौत्।

**डा. जयप्रकाशनारायणः** – श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठे १०.०५.२०१२ तः १२.०५.२०१२ मिते काले आयोजितायां त्रिदिवसीयायां राष्ट्रियप्राकृतसङ्गोष्ठ्यां ११.०५.२०१२ दिनाङ्के कस्यचित् सत्रस्य संयोजनमकरोत् अपि च १२.०५.२०१२ दिनाङ्के 'साहित्यदर्पण में प्रमुख प्राकृतों का विश्लेषणात्मक अध्ययन' इत्यस्मिन् विषये शोधपत्रं प्रास्तौत्।

**डा. अर्चना दुबे** – भोपालपरिसरस्य हिन्दीविभागे सहायकाचार्या इयं भारतीयानुवादसंघ-पंजाबप्राविधिकविश्वविद्यालयाभ्यां जूनमासे २३ तः २६ दिनाङ्कं यावत् नवदेहल्यामायोजिते अन्तार्राष्ट्रियसम्मेलने "भारतीय साहित्य का वैश्वीकरण" इत्यस्मिन् विषये एवं च अप्रैलमासे वेङ्कटसंस्कृतमहाविद्यालये रीवानगरे समायोजितायां राष्ट्रियसङ्गोष्ठ्याम् "साहित्यिक परिप्रेक्ष्य में नारी" इत्यस्मिन् विषये शोधपत्रवाचनं कृतवती।

**डा. नीलाभतिवारी** – भोपालपरिसरस्य शिक्षाशास्त्रविभागस्य सहायकाचार्योऽयं २५ मईतः ०८ जून यावत् इन्दौरे आयोजितस्य प्रान्तीयसंस्कृतप्रशिक्षणवर्गस्य प्रशिक्षणप्रमुखत्वेन दायित्वं निरवहत्। राष्ट्रियसंस्कृतसंस्थानस्य अनौपचारिक-संस्कृतशिक्षकप्रशिक्षणवर्गे जूनमासे १५ दिनाङ्कतः २१ दिनाङ्कं यावत् दर्शनसंस्कृतमहाविद्यालये कर्णावत्यां प्रशिक्षकत्वेन उपस्थितः आसीत्। जूनमासे २३ दिनाङ्कतः २६ दिनाङ्कं यावत् नवदेहल्यां भारतीयानुवादसङ्घेन आयोजिते अन्ताराष्ट्रियसम्मेलने 'संस्कृतस्यावनतौ व्याकरणानुवादविधेः भूमिका' इत्यस्मिन् विषये शोधपत्रवाचनमकरोत्।

**श्रीमती लीना तिवारी** – शिक्षाशास्त्रविभागस्य सहायकाचार्येयं अप्रैलमासे रीवानगरे समायोजितायां राष्ट्रियसङ्गोष्ठ्याम् "वैदिककाले नारी-सशक्तिकरणस्य स्वरूपम्" इत्यस्मिन् विषये एवं च जूनमासे नवदेहल्याम् अन्तार्राष्ट्रियसम्मेलने "Teaching of Translation" इत्यस्मिन् विषये शोधपत्रवाचनमकरोत्।

**डा. मोहिनी अरोरा** – भोपालपरिसरस्य साहित्यविभागस्य सहायकाचार्येयं मईमासे कश्मीरविश्वविद्यालये श्रीनगरे अष्टाविंशति-दिनात्मकम् अभिविन्यासपाठ्यक्रमम् अकरोत्।

## श्रृङ्गेरीपरिसरवार्ता

### सम्पन्ना अखिलभारतीयसंस्कृतलेखनानुवादकौशलप्रशिक्षणकार्यशाला

राष्ट्रियसंस्कृतसंस्थान-संस्कृतसंवर्धनप्रतिष्ठानयोः संयुक्तप्रयत्नेन २८.०५.२०१२ तः ०६.०६.२०१२ पर्यन्तं समायोजिता 'अखिलभारतीयसंस्कृतलेखनानुवादकौशलप्रशिक्षणकार्यशाला' सम्पन्ना। दशदिनव्यापिनीम् इमाम् आवासीयराष्ट्रियकार्यशालां समुदघाटयत् मणिपालस्थसामान्यशिक्षापरिषदः प्रशासनाधिकारी डॉ. एच्. शान्तारामः। एतदवसरे संस्कृतसंवर्धनप्रतिष्ठानस्य न्यासिसचिवः किञ्च संस्कृतभारत्याः अखिलभारतीयप्रकाशनप्रमुखश्च श्रीमान् चमूकृष्णशास्त्री प्रास्ताविकभाषणमाध्यमेन वर्गोद्देश्यं स्वरूपञ्च न्यदर्शयत्। आध्यक्षिकं भाषमाणः राष्ट्रियसंस्कृतसंस्थानान्तर्गतराजीवगान्धीपरिसरस्य प्राचार्यः श्रीमान् वेम्पटिकुटुम्बशास्त्री उक्तवान् यत् "संस्कृतसम्भाषणशिविरस्य आरम्भः अपि अस्मिन्नेव परिसरे जातः आसीत्, तस्य परिणामस्वरूपेण अद्य लक्षशः जनाः संस्कृतेन सम्भाषणे समर्थाः जाताः सन्ति। एवमेव इयं कार्यशालापि इदम्प्रथमतया अत्रैव आयोजिता अस्ति। भविष्ये एतादृशीभिः कार्यशालाभिरपि लक्षशः जनाः लेखनानुवादयोः कुशलतां प्राप्नुयुः" इति। दश दिनानि यावत् निरन्तरं प्रवहन्त्याम् अस्यां गङ्गायां सप्तभ्यः राज्येभ्यः समागताः प्रशिक्षणार्थिनः अवगाहनं कृतवन्तः। कार्यशालेयं पञ्चसु वर्गेषु विभक्ता आसीत्- १. अनुवादपरिष्कारवर्गः, २. व्यावहारिकव्याकरणबोधनवर्गः, ३. विशिष्टप्रयोगवर्गः, ४. लेखनपरिष्कारवर्गः ५. सैद्धान्तिकविषयवर्गः च।

सैद्धान्तिकविषयेषु 'संस्कृता भाषा', 'सरलसंस्कृतं किम्?', 'संस्कृतभाषासम्बन्धे अद्यतनी आवश्यकता', 'नवशब्दनिर्माणम्' 'प्राढोक्तिः' 'प्रोक्तिः', 'आभाणकानि', 'आधुनिकसंस्कृतसाहित्यरचनासमस्याः', 'लेखानां लेखनम्', 'कथालेखनम्', 'सर्जनात्मकलेखनम्', 'पाठ्यपुस्तकलेखनम्', 'भाषासौष्ठवम्', 'अखिलभारतीयमानकं संस्कृतम्', 'भाषितभाषा', 'लेखकभाषा', 'वर्तमानसंस्कृतपत्रिकाणां भाषा', 'लेखने विविधचिह्नानि', 'लेखने भाषणे च प्रभावकारिणी अभिव्यक्तिः', 'अनुशीलनकौशलानि' चेत्येते विषयाः प्रमुखरूपेण चर्चिताः।

कार्यशालायाम् अस्यां राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी, श्रृङ्गेरीपरिसरस्य प्राचार्यः वेम्पटिकुटुम्बशास्त्री, सम्भाषणसन्देशपत्रिकायाः सम्पादकः श्रीमान् जनार्दनहेगडे, संस्कृतभारत्याः एव अखिलभारतीयः अध्यक्षः शिक्षाशास्त्रविद् च श्रीमान् चांदकिरणसलूजा, विभिन्नपरिसरस्य प्राध्यापकाः इत्यादयः तत्तद्विषयमर्मज्ञाः विंशतिः प्रशिक्षकाः समुपस्थिताः आसन्। तत्र प्रशिक्षार्थिनः प्रशिक्षकाश्च सर्वेऽपि 'अहो विलक्षणेयं कार्यशाला' इति एकस्वरेण वदन्तः कार्यशालामिमां नूनं प्रशंसितवन्तः। कार्यशालायाः समापनकार्यक्रमावसरे राजीवगान्धीपरिसरस्य व्याकरणविभागीयः डा. पद्मनाभः कुलपतिवर्यं निवेदयन् उक्तवान् यत् "लेखनानुवाद-कौशलवर्धनार्थं प्राक्शास्त्रिस्तरे एव पाठ्यक्रमे अतिरिक्तविषयत्वेन एकं पत्रं भवेद् येन संस्कृतज्ञाः लेखनेऽपि रुचिमन्तः भविष्यन्ति" इति। अन्ये प्रशिक्षकाः प्रशिक्षार्थिनश्च करतलध्वनिनैव ऐकमत्यं प्रकटितवन्तः।

एतदवसरे भाषमाणः कुलपतिमहोदयः "एतादृक्कार्यशाला इतोऽपि व्यवस्थितरूपेण विभिन्नपरिसरेषु अनुवर्तिष्यामहे" इति प्रतिज्ञातवान्। विशिष्य नवशब्दनिर्माणाय अपि व्यवस्थितरूपेण कार्यशाला भवेदिति स्वमनोभिलाषमपि प्राकटयत्। कार्यक्रमसञ्चालनं कृतवान् परिसरस्यैव प्राध्यापकः डा. गणेशपण्डितः। परिसरस्य आचार्यौ श्रीमन्तौ रामचन्द्रजोयेस-गणेशपण्डितौ कार्यशालायाः अस्याः संयोजकौ आस्ताम्।

### शास्त्रानुशीलनकेन्द्रम् उद्घाटयिष्यते

श्रीश्रीभारतीतीर्थमहास्वामिपादानाम् अनुग्रहेण संस्थानस्य श्रृङ्गेरीपरिसरे उच्चशिक्षार्थं व्याकरण-न्याय-पूर्वमीमांसा-साहित्य-वेदान्तविषयेषु आचार्यस्तरे "शास्त्रानुशीलनकेन्द्रं" समुद्घाट्य त्रिवर्षीय-पाठ्यक्रमः सञ्चालयिष्यते।

राष्ट्रियसंस्कृतसंस्थानस्य श्रीशारदापीठस्य च परस्परं सहयोगेन केन्द्रमिदं प्रवृत्तं भविष्यति।

## इलाहाबादस्थ-गङ्गानाथझापरिसरोदन्तः

### गङ्गानाथ-झा-परिसरे सम्पन्ना निःशुल्क-ज्योतिष-प्रशिक्षण-कार्यशाला

प्रयागस्थे राष्ट्रिय-संस्कृत-संस्थानस्य गङ्गानाथ-झा-परिसरे २१.०५.२०१२ तः ३०.०५.२०१२ दिनाङ्कं यावद् दशदिवसीया निःशुल्क-ज्योतिष-प्रशिक्षण-कार्यशाला प्रवर्तिता। अस्यां कार्यशालायां त्रिंशत् प्रतिभागिनः भागं गृहीत्वा प्रशिक्षकात् प्रो. सर्वनारायण-झा-महोदयात् मुहूर्तशोधनम्, मङ्गलीविचारः, जन्मपत्रफलादेश-सम्बद्धं ज्योतिष- शास्त्रज्ञानं प्राप्तवन्तः।

एषु प्रतिभागिषु प्रयाग-नगरस्य नैके अभियन्त्रिणः, चिकित्सकाः अन्ये च उद्योगिनः संस्कृतानुरागिणः नागरिकाः ३०.०५.१२ तमे दिनाङ्के समापनसमारोहे परिसरस्य प्राचार्यात्। सफल-प्रतिभागि-प्रमाणपत्रं गृहीतवन्तः।

# भोपालपरिसरवार्ता

## राष्ट्रियसंस्कृतनाट्यकार्यशालायाः समायोजनम्



नाट्यकार्यशालायाः उद्घाटनस्य किञ्चन दृश्यम्

भोपालपरिसरस्य नाट्यशास्त्रानुसन्धानकेन्द्रेण २० जून, २०१२ तः २० जुलाई २०१२ यावत् मासात्मिका संस्कृतनाट्यप्रशिक्षणकार्यशाला आयोजिता। अस्याः कार्यशालायाः निर्देशनं राष्ट्रीयनाट्यविद्यालय नवदेहल्याः निदेशकेन प्रो. के.एस. राजेन्द्रन्महोदयेन कृतम्। कार्यशालायां देशस्य विभिन्नभागेभ्यः आगताः विद्वांसः, कलाकाराः, नाट्यविशेषज्ञाश्च संस्कृतनाट्यं प्रशिक्षितवन्तः। सुश्री अञ्जना राजन् (भरतनाट्यम्, नवदेहली), मार्गी मधुः (कुटियाट्टम्, कोच्चिः), इन्दु मधुः (नांगियारकुट्टु, कोच्चिः), श्री शशधराचार्यः (छाऊ, नवदेहली), श्री पी.कण्णन् (कथकलिः, तिरुवनन्तपुरम्), श्री अनूपजोशी (रङ्गसङ्गीतम्, भोपालम्), सुश्री अल्पनावाजपेयी (कथक, भोपालम्) इत्येवम् उल्लिखितानां विधानां कलाकर्मिणः अस्यां कार्यशालायां प्रशिक्षणार्थम् आमन्त्रिताः सन्ति। कार्यशालायां महाकविभवभूतिविरचितस्य उत्तररामचरितस्य प्रस्तुतिः जाता।

अस्याः कार्यशालायाः उद्घाटनं २०.०६.२०१२ दिनाङ्के सायं ४.०० वादने राष्ट्रियसंस्कृतसंस्थानस्य भवभूतिप्रेक्षागारे सम्पन्नं जातम्। कार्यक्रमस्य विशिष्टाऽतिथिः प्रो. के.एस. राजेन्द्रन्, मुख्यातिथिः प्रख्यातः साहित्यकारः कलासमीक्षकः प्रयागशुक्लश्च आस्ताम्। सारस्वताऽतिथित्वेन डॉ. अंजना राजन् महोदया व्यराजत। कार्यक्रमस्य अध्यक्षतां कलाविद् सुविख्यातः हिन्दीलेखकः श्री उदयनवाजपेयी निरवहत्। अस्मिन्नवसरे सुश्रीः अंजना राजन् भरतनाट्यस्य सोदाहरणं व्याख्यानमपि दत्तवती। परिसरप्राचार्यः प्रो. आजादमिश्रः प्रावदत् यत् एकमासीयया अत्यन्तं महत्त्वपूर्णसंस्कृतनाट्यप्रशिक्षणकार्यशालया अनया संस्कृतरङ्गमञ्चस्य विकासः भविष्यतीति। कार्यशालायाः संयोजनं डॉ. संगीता गुन्देचा कृतवती।

## महर्षिबादरायणव्याससम्मानेन सम्मानितः डॉ. धर्मेन्द्रकुमारसिंहदेवः

भोपालपरिसरस्य साहित्यविभागे सहायकाचार्यः डा. धर्मेन्द्रकुमारसिंहदेवः १९.०६.२०१२ दिनाङ्के भारतस्य राष्ट्रपतीनां डा. प्रतिभादेवीसिंहपाटिलमहाशयानां करकमलेभ्यः सम्मानितः। परिसरसदस्याः अस्मै शुभाशयान् प्रदत्तवन्तः।

## प्राचीनकाव्यपाठपरम्पराविषये विशिष्टव्याख्यानं प्रवृत्तम्



आचार्यरमाकान्तशुक्लस्य अभिनन्दनं कुर्वन् आचार्यराधावल्लभत्रिपाठी

भोपालपरिसरे १७.०५.२०१२ दिनाङ्के प्राचीनकाव्यपाठपरम्पराविषये विशिष्ट-व्याख्यानकार्यक्रमः प्रवृत्तः। कार्यक्रमेऽस्मिन् राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः आचार्यः राधावल्लभत्रिपाठी अध्यक्षत्वेन सभां शोभितवान्। मुख्यातिथित्वेन विश्वविश्रुतो विद्वान् आचार्यरमाकान्तशुक्लः स्वीयविचारान् प्रख्यापितवान्। स्वागतभाषणं प्राचार्यः आजादमिश्रः, आभारप्रदर्शनम् आचार्यः विद्यानन्दझाः, सञ्चालनं डा. सङ्गीता गुन्देचा च अकुर्वन्।

# लखनऊपरिसरवृत्तान्तः

## पालि-अध्ययनकेन्द्रस्य निरीक्षणम्

पालि-अध्ययनकेन्द्रे १२.०५.२०१२ इत्यस्मिन्नहनि राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिमहोदयः आचार्यः राधावल्लभत्रिपाठी समागतः आसीत्। अवसरेऽस्मिन् परिसरप्राचार्यः कुलपतिमहोदयस्य स्वागतमकरोत्। पालि-अध्ययनकेन्द्रे कुलपतिमहोदयस्य आध्यक्ष्ये सञ्जाते मार्गदर्शनोपवेशने 'पालिप्राकृतविद्या' इति कस्याश्चित् षाण्मासिकपत्रिकायाः पालिसंस्कृतच्छायाग्रन्थानाञ्च ई-ग्रन्थरूपेण प्रकाशनस्य च निर्णयो जातः। बौद्धदर्शनविभागाध्यक्षः आचार्यः विजयकुमारजैनः परिसरागमनाय कुलपतिमहोदयस्य धन्यवादं प्राकटयत्।

## राष्ट्रपतिना सम्मानितः डॉ. ब्रजभूषण ओझाः

राष्ट्रियसंस्कृतसंस्थानस्य लखनऊपरिसरस्य व्याकरणविभागीयः सहायकाचार्यः डा. ब्रजभूषण ओझाः २०११ वर्षस्य महर्षिबादरायणव्याससम्मानेन सभाजितः। राष्ट्रपतिभवने १९.०६.२०१२ दिनाङ्के भारतस्य राष्ट्रपतीनां डा. प्रतिभादेवीसिंहपाटिलमहाशयानां करकमलेभ्यः सम्माननमिदं डा. ओझामहोदयेन सम्प्राप्तमिति परिसरस्य कृते महत्प्रमोदस्थानम्। परिसरप्राचार्यः आचार्यः सुरेन्द्रझा अन्ये परिसरसदस्याश्च डा. ओझामहोदयस्य अस्यामुपलब्धौ शुभाशयान् प्राकटयन्।

## 'प्यारिस्'-नगरे संस्कृतदिवसः

"संस्कृतं मूलतः भारतीयताम् आवहदपि विश्वबन्धुत्वसाधकमस्ति, प्राचीनमपि वर्तमानकाले व्यवहारभाषा भवितुम् अर्हति, शास्त्रीयम् अपि लौकिकं ज्ञानं सर्वदा पोषयति इत्यतः पुरातनकालापेक्षया अस्य महत्त्वम् इदानीं समधिकं वर्धितम् अस्ति"-एष विचारः 'प्यारिस्'-नगरे ३० जून्, २०१२-दिनाङ्के शनिवासरे 'भारतभवने' (Maison de I'Inde) तस्य भवनस्य तथा च 'भारतसंस्कृतिसङ्गमस्य संयुक्तेन तत्त्वावधानेन इदम्प्राथम्येन समायोजितस्य 'संस्कृतदिवस'-समारोहस्य उद्घाटनावसरे भाषमाणेन भारतभवनस्य निदेशकेन डा. विकाससान्यालमहोदयेन प्रकटितः।

अपराह्णे ३ वादनतः सायम् अष्टवादनं यावत् प्रचलिते समारोहेऽस्मिन् विविधोपयोगिवस्तूनां देवानां महापुरुषाणां च संस्कृतनामोल्लेखपूर्विका वस्तुप्रदर्शिनी आसीत्, तेषां संस्कृतसम्भाषणपूर्वकं वर्णनं 'प्यारिस्'-नगरे सोर्बोन्-नूवेल्-विश्वविद्यालये संस्कृस्य अतिथि-अध्यापकरूपेण विद्यमानेन आचार्य-गोपबन्धुमिश्रेण विहितम्, तेषां फ्रांसीय-भाषया अनुवादमुखेन 'जान्' इत्याख्यया प्रस्तुतिरपि विहिता।

सार्धत्रिवादने प्रो. पी.फिलिओजा, श्रीमती वसुन्धरा फिलिओजा, श्रीमती शुभ्रा पाण्डे (भारतीयदूतावासतः), श्रीमती प्रीतिसान्याल (भारतभवनस्य सांस्कृतिकमन्त्री), श्रीमती भुवना राय (एयर् इण्डिया) चेति मिलित्वा दीपोद्दीपनं विहितवन्तः।

ततः परं प्रो. मिश्रेण गीतायाः चिताः विंशतिः श्लोकाः श्राविताः, मार्क् बालोंफा (Marc Ballenfat) तेषां फ्रांसीयमनुवादमपि तत्रैव अश्रावयत्। रूपी शाहया मधुराष्टकस्य कतिपयश्रीकृष्णस्तोत्राणां च श्रुतिमधुरा प्रस्तुतिः विहिता। तदनु 'प्यारिस्'नगरे सर्पिलगत्या प्रवहन्त्याः 'सैन्'-नद्याः स्तुतिम् आश्रित्य प्रो. मिश्रेण स्वरचितं 'सैन्-पञ्चकं' श्रावितम्। त्वरितं तस्य फ्रांसभाषानुवादः प्रो. पी. फिलिओजामहोदयेन विहितः।

समारोहस्य मुख्यम् आकर्षणम् आसीत् 'ओन्त्वान द सें एक्जुपेरि' (Antoine de Saint Exupery) द्वारा फ्रांसीयभाषया लिखितस्य 'ल पेति प्रींस्' (Le Petit Prince) इत्यस्य पुस्तकस्य प्रो. गोपबन्धुमिश्रेण कृतस्य यः संस्कृतानुवादस्य "कनीयान् राजकुमारः" इत्यस्य चतुर्णां दृश्यानां चतुर्भिः बालकैः नाट्याभिनयः प्रस्तुतः। आदित्यः, अथर्व, श्रेया, आयनः इत्येतैः बालैः अभिनीतानि दृश्यानि सकलैः समादृतानि। विश्वस्य १८० भाषासु एतावत्पर्यन्तम् अनूदितमिदं प्रसिद्धं फ्रांसीयं पुस्तकं प्रथमवारमेव संस्कृतेन अनूदितमस्ति (न तु प्रकाशितमिदमस्ति)। अपरस्माद् ग्रहविशेषात् पृथिवीं प्रति आगतेन 'कनीयसा राजकुमारेण' सह पुस्तकलेखकस्य स्वयं विमानचालकस्य 'सें एक्जुपेरि'-महोदयस्य सहाराख्ये मरुस्थले जातः साक्षात्कारः अत्र वर्णितो विद्यते। विविधेषु ग्रहेषु अटता तेन सरलमतिना राजकुमारेण यथा यथा तत्तद्ग्रहनिवासिभिः राज-श्रेष्ठि-शृगालादिभिः साक्षात्कारो विहित आसीत्, तानि दृश्यानि कुशलतया संस्कृतभाषया एतैः बालकैः साभिनयं प्रस्तुतानि, तदर्थं सर्वैः उपस्थितैः भूयो भूयः सभाजिताश्च ते।

अवसरेऽस्मिन् लैडेन् (नेदरलैन्द्)तः समागतः प्रसिद्धः विद्वान् प्रो. जां हूबेन् (Pro. Jan Houben) 'सौश्रवसपाणिनिशास्त्र-रीतिद्वयपरीक्षा' इति तुलनात्मको विषयः उपस्थापितः। 'इनरिआ' (Inria, Paris), प्यारिस्-तः आगतः प्रो. जेरार् उएत् (Prof. Gerard Huet) तथा च हैदराबाद (भारत)तः आगता प्रो. अम्बाकुलकर्णी 'सङ्गणकीयकं संस्कृतम्' इति विषयं सम्यक् उपस्थापयताम्। तदनु प्रो. पी.फिलिओजा (Pro. P.Filliozat) 'संस्कृतमाहात्म्यं' वर्णितवान्।

अन्ते ए.एल. सेजि (A.L. Chezy) -महोदयेन १८३० तमे वर्षे फ्रांसीयभाषया अनूदितस्य अभिज्ञानशाकुन्तलस्य वाचनिकप्रस्तुतिः चतुर्भिः कलाकारैः विहिता। तत्र मध्ये कतिपयश्लोकानां साक्षात् संस्कृतेन प्रस्तुतिः श्रीमत्या वसुन्धरा फिलिओजया तथा च प्रो. मिश्रेण विहिता। चतुर्णां श्लोकानां भरतनाट्यप्रस्तुतिं भामती फिलिओजा अकरोत्।

'प्यारिस्'-नगरे प्रथमवारम् आयोजितेऽस्मिन् समारोहे आद्यन्तम् उपशतं जनाः उपस्थिताः सन्तः संस्कृतभाषायाः महत्त्वं सम्यग् अनुभूतवन्तः भूयः प्रशंसितवन्तः च।

## विद्युद्दूतः विश्वव्यापिजालपुटे निक्षिप्तः

अन्ताराष्ट्रियसंस्कृताध्यायनसमवायस्य महासचिवेन जयन्द्रसोनिवर्येण कश्चन 'विद्युद्दूतः' इति वैद्युतं पत्रं (Web Page) समारब्धमस्ति। त्रैमासिकस्यास्य विद्युद्दूतस्य प्रथमाङ्कस्य शुभसन्देशः अन्ताराष्ट्रियसंस्कृताध्ययनसमवायस्य अध्यक्षेण आचार्यकुटुम्बशास्त्रिणा रचितः। प्रथमाङ्कतया 'विद्युद्दूतस्य अनुबन्धचतुष्टयम्' इति शीर्षकेण आचार्येण राधावल्लभत्रिपाठिना लेखः लिखितः। विद्युद्दूतस्य द्वितीयाङ्कोऽपि सद्य एव प्रकाशितो जातः। द्वितीयेऽङ्के आचार्येण रामकरणशर्मणा रचितानि कानिचन पद्यानि वर्तन्ते। ततः योगेन् हन्नेदेन डा. राबर्ट-गोल्डमानेन च विश्वसंस्कृतसम्मेलनस्य समापनसमारोहे कथिताः अनुभवाः च वर्तन्ते।

UESDAY, MAY 22, 2012 ■ পৃষ্ঠা ১২ (Pages 12) ■ ৪.০০ টকা (Rs.4.00)

## ১৬২তম জন্ম বাৰ্ষিকীত অধ্যাপক ৰাধাবল্লভ ত্ৰিপাঠী



আলোচনা-চক্ৰত ভাষণৰত উচ্চতম ন্যায়ালয়ৰ প্ৰাক্তন ন্যায়াধীশ মুকুন্দকাম শৰ্মা।

---

## Call to confer Bharat Ratna on Anundoram Borooah

STAFF REPORTER

GUWAHATI, May 21 – Eminent scholars from across the country converging in the capital city to be part of a programme commemorating the 162nd birth anniversary of Anundoram Borooah insisted that the great scholar must get his due honour and be conferred the Bharat Ratna.

These scholars participating in a national seminar on Contribution of Anundoram Borooah to Sanskrit that began on Monday said that an institute for study and research on Indology and allied subjects should be set up in memory of Anundoram Borooah.

DoNER Minister Paban Singh Ghatowar who inaugurated the seminar under... scored the need for proper appreciation of the works of the great scholar and administrator Anundoram Borooah and making the works accessible to the scholars and students outside Assam.

Ghatowar said that the study of Sanskrit has been neglected and it was very important to revive the language for

(See page 9)

### Call to confer Bharat...

izing the works of Anundoram Borooah outside the State which he said will ensure the ... to the great schol-

---

22.5.12. Eastern Chronical

## ...nskrit, Anundoram Borooah... lost chapters, Centre steps in

CHRONICLE NEWS SERVICE
GUWAHATI, MAY 21

... generation ... nows about ...

Sanskrit literature at the Cotton College auditorium today, Dr Mukundakam Sharma, ...ancellor of Shri Lal Bahadur ...htriya Sanskrit ...RSV), New ... Sanskrit ... come up with ...stitute. We will also

we will also make an effort to complete his unfinished works. Borooah was supposed to complete the entire Sanskrit literature in 12 volumes but he was able to complete only two. ...



that SLB-SRSV is soon going to request the Gauhati University authorities to introduce a chair in the name of Anundoram Borooah. H... uld also re... es to set u... d scholar a... tton Col-

DoNER Minister Paban Singh Ghatowar, who was also present in the gathering said that Sanskrit as a subject should be introduced in the curriculum to keep the language alive. "Today's generation hardly knows about the language. People outside the ...

ucation Department to mull over the issue. "They should know the basics of our language. They should know the root of our language. Conducting a function in his name is not going to help," added Sharma.

Ghatowar further said "...

---

## वृत्तदर्पणे संस्थानम्

---

पंजाबकेसरी, दिल्ली दिनांक 11 मई 2012 पृष्ठ 7

## प्राकृत भाषा का व्यापक प्रसार होना चाहिए : प्रदीप जैन

दक्षिणी दिल्ली, (संजीव झा): भारत की लोक भाषा प्राकृत भाषा और साहित्य का भारतीय परम्परा में क्या योगदान और महत्व रहा। इस विषय का केन्द्रबिन्दु बनाकर राष्ट्रीय संस्कृत संस्थान द्वारा श्री लाल बहादुर शास्त्री संस्कृत विद्यापीठ में एक विशाल सेमिनार का आयोजन किया गया। इस मौके पर मुख्य अतिथि के रूप में पधारे केन्द्रीय ग्रामीण विकास राज्यमंत्री प्रदीप जैन ने अपने विचार व्यक्त करते हुए प्राकृत भाषा और साहित्य का महत्व बताते हुए बुन्देलखण्ड क्षेत्र में इसकी विशेष उपयोगिता बताई और आगामी सेमिनार इस क्षेत्र में करने के लिए आमंत्रण दिया। सभा के विशिष्ट अतिथि विद्यापीठ के कुलाधिपति न्यायमूर्ति डा. मुकुन्दकाम शर्मा ने विश्व की भाषाओं के आंतरिक सम्बन्ध को प्रमाणपूर्वक सिद्ध किया। बनारस से आए डा. कमलेश दत्त त्रिपाठी ने अपने विद्वतापूर्ण भा... संस्कृत और प्राकृत भाषा को ... दूसरे का पूरक बताया। ... अध्यक्ष राष्ट्रीय संस्कृत सं... कुलपति प्रो. राधाबल्लभ ... संस्कृत, प्राकृत और पाली ... की उन्नति के लिए विश... को सम्मिलित रूप से ... तरीके से काम करने का ... किया। समारोह के ... सुदीप जैन ने बताया ... की इस संगोष्ठी में ... सत्रों में 100 से अ... शोध आलेख प्रस्त... अतिथियों का स... कुलसचिव डा. ... किया तथा धन्य... ने किया। इस ... और व्याकर... शीर्षक पुस्त... डा. शुक्ला मुखर्जी ने ...

---

### Employment News 7 - 13 July 2012

**Rashtriya Sanskrit Sansthan**
**(Deemed University)**
**56-57, Institutional Area, Janak Puri, New Delhi-110058**

**Notification of Scholarship**

Rashtriya Sanskrit Sansthan (Deemed University) set up by the Government of India for propagation and promotion of Sanskrit language invites applications in the prescribed form for award of merit Scholarship to:

i. Regular students studying Sanskrit including Pali and Prakrit in any recognized traditional Pathshalas/ modern institutions / Secondary / Senior Secondary Schools from 9th to 12th standard.

ii. Scholarship is per year Rs. 2500/- for 9th, 10th, Rs. 3000/- for 11th, 12th. Details of advertisement see the website of www.sanskrit.nic.in

Registrar
EN 14/31

---

22.5.12. Dainik Assam Guwahati

## আনন্দৰাম বৰুৱাৰ পাণ্ডিত্য মেক্সমূলাৰৰ সৈতে তুলনীয়

# राष्ट्रियसंस्कृतसंस्थानम्

(राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा 'ए-श्रेण्यां' प्रत्यायितम्)

बहुपरिसरीयः बृहत्तमः मानितसंस्कृतविश्वविद्यालयः

(भारतशासनस्य मानवसंसाधनविकासमन्त्रालयाधीनः)

५६-५७, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-११० ०५८


## मुक्तस्वाध्यायपीठम्


(Institute of Distance Education)

दूरस्थशिक्षाविधिना पाठ्यक्रमाः

## अचिरादेव समारप्स्यन्ते

## संस्कृतपत्रकारितापालिप्राकृतानां पाठ्यक्रमाः




राष्ट्रियसंस्कृतसंस्थानस्य मुक्तस्वाध्यायपीठम् (Institute of Distance Education) इत्यनेन संस्कृतपत्रकारिताप्रमाणपत्रीयपाठ्यक्रमः, प्रारम्भिकपालिपरिचयपाठ्यक्रमः, पालिप्रमाणपत्रीयपाठ्यक्रमः, प्रारम्भिकप्राकृतपरिचयपाठ्यक्रमः, प्राकृतप्रमाणपत्रीयपाठ्यक्रमः च अचिरादेव समारप्स्यन्ते।

### सम्पर्कसूत्रम्

**डा. जयप्रकाशनारायणः**

(संयोजकः, पालि-प्राकृतपाठ्यक्रमाः)

दूरवाणी -९९९९० ६४३१४

**डा. प्रफुल्लगडपालः**

(संयोजकः संस्कृतपत्रकारिताप्रमाणपत्रपाठ्यक्रमः)

दूरवाणी - ९८९१४ ००८१९

### सङ्केतः

**मुक्तस्वाध्यायपीठम्**

राष्ट्रियसंस्कृतसंस्थानम्

(मानितविश्वविद्यालयः)

५६-५७, इन्स्टीट्यूशनल् एरिया,

जनकपुरी, नवदेहली-११० ०५८

दूरवाणी - ०११-२८५२ १९९४

०११-२८५२३६११

**e-mail** - mspeetham@gmail.com,

mspeetham@yahoo.co.in

Sanskritavarta : Quarterly News Bulletin of Rashtriya Sanskrit Sansthan Vol.III Issue No 16, Pub. by the Registrar for Rashtriya Sanskrit Sansthan, 56-57, Institutional Area, Janakpuri, New Delhi-110058 & Printed at D.V. Printers, 97-U.B. Jawahar Nagar, Delhi-110007